अथ

"न्याय.सिध्दान्तमंजरी"

९८७

(जानकीनाथ विरचिता)

व्याख्या सहिता

व्याख्याता:- "नरसिंहः"

107/10

अत्रसं२

१ज८·टी· १

॥ ॥श्रीगणेशायनमः॥ ॥नत्वागुरुपदद्वंद्वंचिंतयित्वासितंमहः॥सिद्धांतमंजरीभूषांकरोमिशिशुकार्ययोः॥श्रीमतश्रीयुतगौ
डमंडलमहीविख्यातसत्कीर्त्तिर्नानास्तकीलंकृतिनः परस्तुकृतिर्नागोविंदनामाभिधः॥ततस्तत्सुनुर्नरसिंहएषसुकृतीभावंतुयं
चाननो॥बालानांहितकांत्वयास्फुटयतिद्राकल्पायसिद्धांतिते॥सिद्धांतमंजरीतर्कमधुरक्तमधुव्रतानामार्गगानकर्त्तुमा
मोद्वातभावोविविच्यते॥ईप्सितग्रंथप्रतिबंधकदुरितनिवृत्तयेकृतंपरमात्मनमस्काररूपंमंगलंशिष्यशिक्षायैग्रंथा
दौनिबध्नाति॥प्रणम्येति॥परमात्मानंप्रणम्यजानकीनाथशर्मणान्यायसिद्धांतमंजरीक्रियतइत्यन्वयः॥ईश्वरात्मनिम
हत्वपरिमाणस्यदीधितिकृत्संमतत्वात्तस्यजीवात्मसाधारणेननमस्कार्यतानवच्छेदकत्वाच्चात्रपरमत्वंसर्वज्ञत्वनि राम
त्यकृतिमत्वादिकमेवेतिमंतव्यं॥आत्मत्वंतुजीवात्मईश्वरात्मसाधारणंआत्मपदशक्यतावच्छेदकत्वेनसिद्ध्यतीतिध्येयं॥ १

ञा१ कारणतावच्छेदक१

नचैवमभावपदशक्यतावच्छेदकतयाऽभावत्वमपिजातिःस्यादितिवाच्यंभवतामपिकार्य्यतावच्छेदकतयाजातिसिद्धिरितिनिय
मेजन्यसत्वकार्य्यतावच्छेदकतयाध्वंसादेरपिजातित्वापत्तेः।यदिवासतिबाधकइतितद्यापेनिवेश्यतेतदाप्रकृतत्याग्राच
पितत्रिवेशपमितितुल्यं।अत्रनमस्कारनिष्ठभक्तित्वप्रह्वत्वादिप्रकर्षजातिविशेषपापर्कंनमःपदसमभिव्याहृतंप्रेत्तुपस
र्गपदंतथाचप्रकृष्टनमस्कारंकृत्वेत्यर्थः।तथाकृताहिनतिर्मंगलंभवतीतिभावः। [illegible]
नी३ कैःकृत्वेत्यहाँयुक्तिमुक्तायुक्तिमुक्ताताभिरित्यर्थः।तथाचात्रयुक्तीनांमुक्तासारूप्यनिर्देशान्निर्म्मलत्वंसूचितमितिभावः
मंजरीपदाङ्रथकोमलत्वंसूचितमितिभावः।प्रयोजनज्ञानंविनाशास्त्रेप्रवृत्तिरेवनस्यादतआहाइहेतिइहसंसारेकिलनि
ख्रितंनिखिललोकानांश्रवणाधिकारिणां।तेनगंगादिमरणान्तकस्यचितस्त्रीशूद्रादिलोकस्यमुक्तावपिनव्याप्तिः।विमुरंमु

यएव३
युक्तिमुक्ताभिरिति३॥ वतीर अत्रर्ह१

नमीसाद्साधनत्वेर
५४

सि.म.न.
२

ख्योपायंतत्वज्ञानंमामननंनीतियोजनं।मननोपायमिति।मननंउपायीभूतंयत्रतत्मननोपायं।मणनप्रयोज्यमित्यर्थः।तेनतत्व
ज्ञानंप्रत्तिमणनस्यनिदिध्यासनद्वाराकारणत्वेऽपिनप्रयोजकत्वहानिरितिध्येयं।एतच्चतत्वज्ञानविशेषणं।तथाचमणनप्रयो
ज्यंतत्वज्ञानमित्यर्थः।यद्यपिकाशीमरणजन्यमुक्तिस्थलेशिवस्यतत्वोपदेशकत्वेनतत्वज्ञानसामान्येमननंनोपायीभूतं।
तथापितत्वज्ञानपदेनतत्वज्ञानविशेषस्तु।सचविशेषोमणनादिजन्यतावच्छेदकतयासिद्धः।अतएवनिखिललोकपदं
श्रवणपरत्वेनविवक्षितं।तथाचश्रवणवतांविमों मुख्योपायंतत्वज्ञानंमननप्रयोज्यं।नतुतत्वज्ञानसामान्यं।अतोका राम
शीमरणजन्यमुक्तौश्रवणादिमत्वेनाधिकाराभावात्।तदुपायीभूतशिवोपदेशजतत्वज्ञानेमननाप्रयोज्यत्वेऽपिनक्षतिरि २
तिभावः।तच्चेतितत्समननंप्रमाणाधीनमिति।मंतव्यश्चोपपत्तिभिरितिदर्शनात्।यद्वातत्ततत्वज्ञानमित्यर्थः।तदादिसर्वना

५३

न्नः आकांक्षावशात् उत्सर्गतो विशेष्यबोधकत्वं। यथा नीलपदसुंदरः सचमानीत्यादौ न नीलाद्युपस्थापकत्वं सर्वनाम्नः किंतु सुंद
रादिविशेष्यस्यैव तथा प्रकृतेपीत्यपि केचित्॥ प्रमाणं निरूप्यत इति प्रतिज्ञा च शिष्यावधारणार्थमि त्या[illegible] तत्र लक्षणस्वरूपा
दिभिः प्रमाणं निरूपणीयं। प्रमाकरणं चक्षुरादि प्रमाणमिति लक्षणार्थः। अत्र करणं प्रमाणमित्युक्तौ कुठारादावतिव्याप्तिरत उ
क्तं प्रमेति। प्रमाकरणमित्युक्तौ संस्कारद्वारा स्मरणजनके अनुभवेतिव्याप्तिरत उक्तं प्रेति स्मृतेरप्रमात्वात्। प्रमाकरणत्व घटकी
भूतप्रमात्वस्यानुभवगर्भितत्वात्। अनुभवत्वगर्भितं प्रमात्वमग्रे वक्ष्यतीति ध्येयं। ननु तद्वति तत्प्रकारकज्ञानत्वं प्रामा
ण्यं ज्ञानस्य तथा च तदाश्रयीभूतस्मृतिं प्रति संस्कारद्वाराकरणत्वेनानुभवस्य प्रमाणत्वापत्तेरतस्याहाप्रमा चेति [illegible] त्व ल२
णो प्रमा चेत्यर्थः। तथा चानुभवइत्यनेन स्मृतेर्निरासात् प्रकृते अनुभवत्वगर्भितं प्रामाण्यं स्मृतिव्यावृत्तमेव प्रमाणलक्षण

सि॰टी॰
३

र्था २

निविष्टमितिनानुभवस्य संस्कारादेव अतिरिक्तप्रमाणत्वापत्तिरितिभावः॥ स्वोक्तप्रमाणलक्षणनिविष्टप्रमालक्षणे प्राचीनस
म्मतिमाह तत्राद्धरिति॥ सामान्यत एव सर्वत्र प्रमात्वमाद्धरित्यर्थः॥ अत एव यथार्थानुभवो मानमनपेक्षतयेष्यत इति न्यायकुसु
मांजलौ वाच्यः॥ तत्रानपेक्षतया इतरप्रामाण्यानधीनप्रामाण्यतया॥ तथा च स्मृतेर्जनकानुभवसमानविषयतया तत्
प्रामाण्याधीनप्रामाण्यकतया सापेक्षत्वात् न प्रामाण्यमित्यर्थः॥ अत्राद्धरित्यनेनास्वरसः सूचितः॥ स च लाघवात्॥ तद्वति त
त्प्रकारकत्वरूपप्रामाण्यस्य सर्वसाधारणस्य संभवादलमनुभवत्वप्रवेशेन॥ अविरोधं तं स्फुटीकरिष्यति॥ तद्वतितदवगाहित्व
मित्यादिना प्रमाकरणविशेषस्यानुभवगर्भितप्रमाकरणस्यैव वा प्रमाणत्वात् संस्कारानुभवादावतिरिक्तप्रमाणत्वापत्तिः॥ राम ३
यदसाधारणं कारणं प्राप्य मनो बहिर्गोचरां प्रमां जनयतीत्यत्र व्याप्तौ च प्रमात्वस्यानुभवत्वगर्भितत्वात्॥ एतस्याप्येवं वाच्या

लै ३ लै २ वै ३

स्पे ३ स्प ४

प्रेरणयोजकत्वात्। एवं च स्मृतिर्यथार्थेत्यभियुक्तानां व्यवहारोपि संगच्छते। अत एव विशेष्यावृत्त्यप्रकारत्वं प्रामाण्यं स्मृति
साधारणं निर्विकल्पकसाधारणं चेति मणिकृतः। तदवगाहित्वं तत्प्रकारकत्वं लक्ष्ये लक्षणं संगमयति। भवति हि तति तद्वति तद
वगाही तद्वति तत्प्रकारक इत्यर्थः। अल[illegible]ल रूप्यासत्वमाह। शुक्ताविदं रजतमिति तदवगाही रजतत्वावगाहीत्यर्थः। इदं
याथार्थ्यं च ज्ञाने च्छादिसाधारणमिति ध्येयं। अत्राति व्याप्तिं शंकते नैनच्चिति। ल[illegible]त्वमेव तस्यांगीकुर्वन् परिहरति। रजतत्वांशे
ति निश्चयत्वागमितिस्वोक्तेः प्रामाण्ये प्राचीनसम्मतिमाह। तद्वतीति। तथा च पर्षां चोपि अत्र भवत्वमेवाधिकं लक्षणे निवेशयंति।
न तु निश्चयत्वमपीति। संशयेपि प्रामाण्यं सिद्धमिति भावः। ननु तथा न प्रमातस्य मूलस्य तदनवच्छेदकत्वात्। संयोगानवच्छेद
कत्वात्। तथा चावच्छेदकत्वाभाववति अवच्छेदकत्वावगाहनात् मूलेऽवच्छेदकत्वधीरप्रमेति भावः। प्राकृजिज्ञासितमेव भवत्वे।

त १ तु २

त्वं१ बुद्धित्वोपलक्षितवत् ४

जीर्णमते निर्विकल्पस्मृतीति। नवीनमते त्वाह। जातिविशेष इति। जातिविषयत्वादिति। इदमुपलक्षणं। विशेषणज्ञानकार्यतावच्छेद
ककोटिप्रविष्टत्वेनापि अनुभवत्वजातिसिद्धेः। अत एव विशिष्टानुभवं प्रत्येव विशेषणधियो हेतुत्वमित्याहुरिति दीधितिकृतो वदंति। वस्तु
तोऽनुभवत्वस्य प्रत्यक्षत्वात्मकमेवेति। नानुमित्यादिसाधारणं। अन्यथा वह्निसंसर्गाद्यनुमितिशाब्दोत्तरं च वह्निमनुमिनोमीत्यादिवत्
वह्निमनुभवामीति बोधः स्यात्। एवं संसर्गशाब्दोत्तरमपि संसर्गमनुभवामीति च स्यात्। एवं च साक्षात्कारत्वमेवानुभवत्वं। तत्रैवानुभवा
मीति च दर्शनात्। तथा च प्रत्यक्षादिचतुष्टये चानुभवव्यवहारे विषयीभूतं स्मृतिभिन्नज्ञानत्वोपाधिरूपमेवानुभवत्वं तदेव च विशे
षणज्ञानजन्यतावच्छेदकं तत्त्वोपाधिरूपं मनसोऽयोग्यं इति नानुव्यवसायगम्यं प्रत्यक्षे अनुभवामीति बोधविषयता चानुभवत्व राम
रूपसाक्षात्कारत्वजातिमादाय स्मृतिभिन्नज्ञानत्वोपाधिमादाय तत्त्वोपाधिभूतं प्रत्यक्षादिचतुष्टयेपि प्रमि[illegible]तिजीर्णमतमेव दोषा ४

नतु१ तिथि१

त्रिरस्तमितियुक्तमुत्पश्यामः॥ नन्वक्तप्रमाणलक्षणेकरणत्वं किं तदाह। व्यापारवदिति। दलद्वयोः क्रमेण फलमाह। घटं पततीति।
असाधारणेत्तीति। असाधारणं च कार्य्यत्वातिरिक्तकार्य्यत्वव्याप्यतद्धर्मावच्छिन्नकार्य्यतानिरूपितकारणतावत्त्वमित्यर्थः॥ नन्वे
वमिति। एवमसाधारणकारणत्वस्यकरणताघटकत्वे। आत्ममनःसंयोगस्येति। इदमुपलक्षणं। आत्मनोज्ञानं प्रत्यसाधारण
त्वाद्वेत्यपि ध्येयं। इष्टापत्त्यापरिहरति स्यादेवेति। व्यवहारभेदः करणत्वकारणत्वादिव्यवहारवैचित्र्यं। अत एव एकस्यैव वक्तुः
न करणत्वकारणत्वादिभेदादेव अत एव चक्षुरिच्छायाविभक्तिनियामकत्वादेव। अंगीचक्रुरित्यनेनास्वरसः सूचितः। कारण सव ३
त्वादेरखंडोपाधित्वे गतं कंतुग्रीवा..दिमत्त्वादिसखंडोपाधिना किंचकार्य्यत्वादेवप्येवमखंडोपाधित्वे कार्य्यत्वावच्छिन्नं प्रत्यदृष्टत्वे
न कारणत्वसंभवात्। अदृष्टत्वादेः कारणतावच्छेदकतया जातित्वापत्तेश्चेत्याहुः। न्यूनातिरिक्तत्वादिनां मतव्यवच्छेदायाह। नन्वेति।

प्रमाण ३

णत्वादिति ध्येयम् ॥ प्रमाण २

सा॰ति १

तत्रेति सप्तमी तथा च चतुर्विधप्रमाणेनिरूपणीये सतीत्यर्थः ॥ प्रथमोद्दिष्टत्वात् प्रत्यक्षलक्षणमाह साक्षात्कारिरूपेति प्रमेति प्रत्यक्षताभिप्रा
यं प्रमाकरणनिरूपणस्यैव प्रतिज्ञातत्वात् ॥ वक्ष्यतो साक्षात्कारिप्रमाकरणस्यापि च करणादेः प्रमात्वात् ॥ ज्ञानित्वेव साधु इयं साक्षा
त्करोमीत्यनुगतप्रतीतिः ॥ समाधत्ते ज्ञानमात्रेति तथा चानुमित्यादावपि साक्षात्करोमीति प्रतीतिः स्यादिति भावः ॥ न तु ज्ञान
मात्रे मनसो मनस्त्वेन जन्यकतानतिंद्रियत्वेन विवक्षितं चात्र तथेत्यत आह ॥ [illegible]
[illegible] इं
द्रियाप्रतीतावपीति ॥ तथा च न तारशोपाधिरूपं साक्षात्कारत्वं अपि तु जातिरूपमिति भावः ॥ नन्वनुगतप्रतीत्या चेत् जातिसिद्धिस्त
दाप्रमात्वादेरपि प्रमेत्यनुगतप्रतीत्या जातित्वापत्तेः ॥ न च साक्षात्कारत्वावच्छिन्नं प्रति इंद्रियत्वादिना कारणत्वात् कार्यतावच्छेदकत

यासाक्षात्कारत्वंजातिरितिवाच्यं।ईश्वरसाक्षात्कारसाधारणसाक्षात्कारस्यकार्यतानवच्छेदकत्वात्कारणतावच्छेदकस्यइंद्रियत्व
स्यचैकस्याभावादुक्तानुगतप्रतीत्याचप्रमाणांतरागोचरयालौकिकविषयतयाएवविषयीकरणादतआह।यद्वेतिनव्या
क्तसाक्षात्करोमीतिप्रतीत्यालौकिकविषयतैवावगाह्यतेनतुजातिरन्यथागतंतादृशविषयतयेत्यतआह।यद्वेति।जन्यधीः कु॰२
व्याप्तिज्ञानअतिदेशवाक्यार्थज्ञानपदज्ञानादितज्जन्यमात्रवृत्तिजातिरनुमितित्वोपमितित्वशाब्दत्वादितत्रशून्यत्वंप्रत्य
त्वेइत्यर्थः।ईश्वरज्ञानजन्यप्रत्यक्षवृत्तिचाक्षुषत्वादिजातिशून्यत्वाभावेनाव्याप्त्यापत्तेर्जन्यत्वंधीविशेषणं।एवंधीपदत्यागे
पिजन्यीकृतचक्षुरादिजन्यचाक्षुषमात्रवृत्तिचाक्षुषत्वमादायाव्याप्तिदोषएवबोध्यः।जन्यधीमात्रवृत्तिजातिशून्यत्वमित्येताव
न्मात्रेकृतेचाक्षुषत्वादिमादायपुनरव्याप्तिरतोद्वितीयंजन्यत्वंनिवेशितं।तथाचजन्यधीजन्यमात्रवृत्तिजातिर्नचाक्षुषत्वादिकंनि

र्विकल्पेपिचाक्षुषत्वसत्वात्तनाद्याप्तिरितिभावः॥जन्यधीजन्यवृत्तिजातिशून्यत्वंएतावन्मात्रेकृतेज्ञानत्वसत्वादिजातिमादायासंभवः
इत्यतोजन्यधीजन्यमात्रवृत्तित्वंजातिविशेषणं॥जातिपदंचसमवायेनवृत्तिताशून्यत्वलाभायतेनताद्दशजातेरभुमितित्वादेः
कालिकेनसंबंधेनसाक्षात्कारेसत्वेपिनासंभवः॥ताद्दशजातिशून्यत्वमित्येतावन्मात्रेकृतेघटादावतिव्याप्तिरितिज्ञानत्वप
र्य्यंतानुधावनंलक्षणेलापयति॥भवतिहीतिवक्तनोइत्तोपिलघुतयावैशिष्ट्यावगाहिज्ञानेवृत्तिअनुभवत्वव्याप्यजा
तिमत्वं॥ततइंद्रियत्वस्याखंडोपाधितयाजन्यसाक्षात्कारत्वावच्छिन्नंप्रतिइंद्रियत्वमनस्त्वादिनावाकारणत्वात्॥कार्य्यतावच्छे
दककोटिनिविष्टतयैवजन्यसत्वेनध्वंसत्वेनकार्य्यकारणभावेकारणतावच्छेदककोटिनिविष्टतयासन्नेवसाक्षात्कारत्वजातिसि राम
द्धेस्ताद्दशजातिमत्वंवात॥दिंडतत्वंलक्षणेव्याप्तिमाशंकतेनचेति॥निदिध्यासनजन्येति॥तथाचनिदिध्यासनजन्यतावच्छेदकतया ६

मोक्षजनकतावच्छेदकतयावातादृशजातिसिद्धिः।एवंचकाशीमरणेशिवतत्त्वोपदेशात्तदुक्तावपिनक्षतिरितिभावः।मानसेति
तथाचमोक्षजनकतावच्छेदिकानिदिध्यासनजन्यतावच्छेदिकावाजातिर्मानसमात्रवृत्तिनीतितद्बुद्धासमइतिभावः।ननुमानस
त्वस्यमानोजन्यरूपस्यनानात्वात्तैर्नतदनुगतलक्षणसंभवइत्यतआह।मानसत्वंचेति।वैशिष्ट्येति।तथाचवैशिष्ट्यावगाहिनिर्वि
कल्पकंतन्मतेसाक्षात्काररूपमित्यर्थः।अयंघटइत्यादिज्ञानेवैशिष्ट्यविषयकज्ञानेइत्यर्थः।बाधकंविनेति।इदमुपलक्षणं।
प्रत्युतअयंघटइतिविशिष्टसाक्षात्कारानन्तरंसाक्षात्कारीत्यनुभवस्यानुगताकारस्यसाधकस्यापिसत्वादितिध्येयं।घटत्वादेरि
तितथाचघटघटइत्याद्यनुगतमतेःकारणानियम्यत्वात्घटादेरेवजातेःसतःकारणत्वादितिभावः।नित्यज्ञानानंगीकर्तृभट्टा
दिमतन्यवच्छेत्तुमाह।सचेति।निर्विकल्पस्यवैशिष्ट्यविषयत्वमस्त्येवपरंवैशिष्ट्यसांसर्गिकविषयतानेतिलक्षणासंभवइत्यतआह।

सिद्धां·टी·न·
६

निष्प्रकारकं चेति। ~~[illegible]~~। तच्चेति। तत्र निर्विकल्पकं। ~~अनुमेयमिति~~। अनुमेयमिति। अनुमानं च अयं घट इति प्राथमिकविशिष्टसाक्षात्का
रविशेषणज्ञानजन्यविशिष्टज्ञानत्वात्। द्वितीयादिविशिष्टज्ञानवत्। अत्रानुमाने कार्य्यकारणभावं अनुकूलतर्कमाह। तथाहीति।
तदानीं प्राथमिकविशिष्टसाक्षात्कारपूर्वं तथा च विशेषणज्ञानाभावे कथमाद्यविशिष्टसाक्षात्कारः स्यादित्यर्थः। ततः आद्यघ
टत्वादिविशिष्टसाक्षात्कारपूर्वं विशेषणघटत्वादिज्ञानस्य घटत्वादिविशिष्टज्ञानात्मकस्यासंभवात्। तत्र विशेषणज्ञानं भ्रां
तः शंकते न चेति। तत्र आद्यविशिष्टसाक्षात्कारे भ्रमं निराकृत्य समाधत्ते अव्यवहितेति। पुनर्भ्रांतः शंकते। न च भागवतेति। भ्रमं नि
राकुरुते। सामानाधिकरण्येति। व्यधिकरणत्वात्। [illegible]लीभूतविशिष्टज्ञानासमानाधिकरणत्वात्। तत्राद्यविशिष्टसाक्षात्कारादौ त
देव विशिष्टज्ञानं विशिष्टस्मरणात्मकं विशिष्टज्ञानं इत्यर्थः। विशिष्टानुभवे इति। तथा च विशेषणज्ञानकार्य्यतावच्छेदककोटिप्रविष्टतया। राम ७

फर ही१

तरापे २   न२

अनुभवत्वं जातिः सिद्ध्यतीत्यपि गंतव्यं। अन्यथा विशिष्टस्मरणं प्रत्यपि विशेषणज्ञानकारणत्वेऽनवस्थानादितिमिविशिष्टस्मरणो
पि विशिष्टस्मरणं [blot] स्वीकरणान्न तत्रापि च विशिष्टस्मरणांतरापेक्षणात् इत्यर्थः। अनवस्थां परिहरति। अस्फु चेति। तथा च घटत्वप्रका
रकघटविशेष्यकनिश्चयत्वं कारणतावच्छेदकं घटत्वातिरिक्तप्रकारकस्मृतित्वं कार्यतावच्छेदकं निर्विकल्पकसाधारणं
न चैवं घटोऽद्रव्यमित्यनुभवात्। घटोऽद्रव्यमिति स्मरणानुपपत्तिः घटत्वातिरिक्तस्याद्रव्यत्वादेरपि प्रकारत्वादिति वाच्यं। घ
टत्वप्रकारकत्वे सति रिक्तप्रकारकान्यघटविषयकस्मृतित्वस्य निर्विकल्पकस्मृतौ अदृष्टविशेषणस्यैव कारणतानत
निश्चयस्येत्यत आह। किं चेति। अन्वयव्यतिरेकाभ्यामिति। अत्र नव्याः। विशिष्टबुद्धिं प्रति विशेषणज्ञानहेतुत्वे सिद्धे आद्यविशि
ष्टप्रत्यक्षानुरोधेन निर्विकल्पकसिद्धिस्तत्रैव वचमानं पश्यामः। न तु विशिष्टबुद्धित्वं नाम एकं सामान्यमस्ति तस्य वैशिष्ट्यादिभेद

स्मृतिसाधारणस्य कार्यतावच्छेदकत्वात् इति भावः। ननु स्मृतिं प्रति विशिष्यनिश्चयस्यावरूपं हेतु [blot] त्वाद्दूरं चेत्रत्वप्रकारक ३
घटत्वाति ३

न१

सि. टी. नरसिंह
॥६॥

भिन्नत्वात्। घटत्वादिविशिष्टसाक्षात्कारत्वत्वादिकं आद्यविशिष्टप्रत्यक्षानुरोधेन तत्र च सन्निकर्षव्याप्तिज्ञानादेरेव विशिष्टधीहेतुत्वसंभ
वात्। न विशेषणज्ञानस्य कारणत्वं न चैवं सन्निकर्षादितः कदाचित् द्रव्यं कदाचित् घट इति विभिन्नप्रकारकज्ञाने किं नियामकमि
ति वाच्यं सन्निकर्षात्तत्र हृत्तियोगपद्यावद्धर्म्मघटत्वद्रव्यत्वादिप्रकारकयुगपत्ज्ञानोत्पत्तेर्नैकैकक्रमिकतावद्धर्मविशिष्टबोधः
अनुमित्यादौ तु तत्तद्धर्मावच्छिन्नव्याप्त्यादिज्ञानस्य नियामकत्वात्। नैकदा तावद्धर्म्मविशिष्टबोधः॥ न चैवं घटचक्षुःसंयोगानंतरं
कदाचित् तृतीयचतुर्थादिक्षणे घटमनुभवामि कदाचिच्च द्रव्यमनुभवामीति न स्यादिति वाच्यं। अदृष्टविशेषस्यैव तन्निया
मकत्वात्। अन्यथा तव मतेपि घटो द्रव्यमिति विशिष्टबोधानंतरं कदाचित् घटमनुभवामि कदाचित् द्रव्यमनुभवामि कदाचिच्च राम ६
घटं द्रव्यं चानुभवामीत्यनुव्यवसायस्य अनुभूयमानस्य दुरपह्नवत्वेनादृष्टविशेषस्यैव नियामकस्य वक्तव्यत्वादिति। अथ घटचक्षुः

ग्प२ तु१ व३

संयोगानंतरंकदाचित्पृथिवीकदाचित्घटःकदाचिद्द्रव्यंइत्यादिबोधस्यानुभूयमानस्यापलापापत्तेःसर्वत्रैवघटचक्षुःसंयोगानंतरंनि
यमेनघटवृत्तियोग्ययावद्धर्मप्रकारकसमूहालंबनबोधापत्तेश्च किंचघटचक्षुःसंयोगानंतरंयोग्यपर्याप्तधर्मप्रकारकसमूहालंबन
बोधापत्तेश्च किंचघटचक्षुःसंयोगानंतरंनियमेनघटवृत्तियोग्यपर्याप्तधर्मप्रकारकबोधेसिद्धेतत्रैवघटेऽनुभूयमानपृथिव्यादि वीत्वा३
संशयानुपपत्तेःतस्यापिनिर्णयात्तन्नचैवंघटघटत्वनिर्विकल्पावसरेतद्वृत्तिद्रव्यत्वपृथिवीत्वादिनिर्विकल्पकसंभवेघटवृ
त्तियोग्ययावद्धर्मप्रकारकबोधापत्तौनकिंचिदपिबाधकंतवमतेपीतितवापिकथंतत्रैवघटेपृथिवीत्वादिसंशयइतिवाच्यं।
तत्रफलबलात्तन्निर्विकल्पकमेवपृथिवीत्वादेर्नोत्पन्नमितिकल्प्यतेऽत्रदृष्टाभावादितिचेत्तन्नअदृष्टस्यशरणीकरणीयत्वेगतंविशे
षणज्ञानकारणत्वेनगतंचतदनुरोधान्निर्विकल्पेनकदाचित्घटःकदाचित्पृथिवीत्यादिबोधेऽदृष्टविशेषस्यैवनियामकत्वादि

तथा३ वीत्वा३

मि.मुं.टी.न.
९

तिपाङ्गः। वैशिष्ट्यावगाहीत्युक्तेनिर्विकल्पकेपि घटत्वादिविषयितावत्तद्वैशिष्ट्यविषयितायाअपिसंभवादतिव्याप्त्यापत्तेराहसप्रकारकं
चेति। ननुविषयतायाविषयरूपत्वेअनुगतप्रतीतिर्नस्यात्तद्विषयस्यनानात्वादतआहपदार्थांतरमिति। एकदेशिनः। नवीनाः। ज्ञा
नजन्यइति। अत्रज्ञानंनिमित्तकारणंघटःसमवायिकारणं। भावकार्य्यंसासमवायिकारणकंइतिनियमोनतन्मते। एकत्वादौव्यभि
चारात्। यद्विकपालैकत्वादिकंत्वेःसमवायिकारणंतदातत्रापिज्ञानमेवासमवायिकारणंकिंतुभावकार्य्यंसमवायिकारणाजन्य
मितिनियमः। तथासतिअभावादौज्ञानसंबंधरूपप्राकट्यानुपपत्तेरितिध्येयं। [illegible]
[illegible] ज्ञानकर्म्मत्वमिति। घटंजानातीत्यादौज्ञानजन्यफलशा राम ९
लित्वमेयघटादौकर्म्मत्वंतद्विनाज्ञानजन्यज्ञाततांनिर्वहतीतिभावः। नचसमवायिकारणंविनेतिस्वमताभिप्रायेणअन्यथाप

स्तत्वमेनास्ति। ३ मेवघटैक४ मितिविभाव्यसे४ मस्त४

त्वार   त३

रमते अभावादौ ज्ञानजनानुपपत्तेरिति ध्येयं। कर्म्मविभक्तेरिति। तथा च क्रियाभेदात् फलभेदाद्वा कर्म्मत्वं नैकमिति घटं जानातीत्यादौ ज्ञा
नविषयात्मकस्वरूपसंबंध एव कर्म्मत्वमिति भावः। तद्वदेवेति। विनष्टघटादिस्थलीयकर्म्मविभक्तिवदित्यर्थः। प्रकारता विषयता
विशेषानंगीकर्त्तृनयेत्याह। भासमानेति। संसर्गतयाभासमानं यद्वैशिष्ट्यं तत्प्रतियोगित्वं तन्निरूपकमित्यर्थः। दिगर्थश्च प्रति
योगित्वस्यातिरिक्तस्य समूहालंबनव्यावृत्तस्यांगीकारे वरं प्रकारतैव विषयतातिरिक्तास्तु तन्नामान्तरकल्पने न किंच प्रति
योगित्वातिरिक्तांगीकारे विनिगमनाविरहेणापि चातिरिक्तकल्पनासिद्धेः इत्यलमधिकेन। सामान्येन प्रत्यक्षं निरूप्य विशि
षेण निरूपयति तच्चेति। तत्तत्साक्षात्काररूपज्ञानकरणं। नन्वद्वितीयानुव्यवसायरूपसाक्षात्काररूपप्रमायां मन इव व्यवसा
यस्यापि करणत्वात्। एवं हानोपादानादिबुद्धेरपि निर्विकल्पस्य करणत्वात् सन्निकर्षस्य च सविकल्पकसाक्षात्कारप्रमाकरणा

स्वे४   करणे४

स्यापि सत्त्वेन बहुविधत्वात्साक्षात्कारिप्रमाकरणस्य द्वैविध्यासंभव इत्यतो इंद्रियात्मकमिति। यद्वा प्रत्यक्षपदेन फलस्याप्युपस्थितेस्तत्र
च द्वैविध्यानुपपत्तेराह। इंद्रियेति। तद्ग्राहकं द्रव्यविषयकलौकिकसाक्षात्कारजनकमित्यर्थः। तेन उपनीततया इक्षुग्राहकरसना
दौ नातिप्रसंग इति भावः। द्रव्यग्राहकतदितरग्राहकयोः क्रमेण गणनमाह। द्रव्यग्राहकेति। अन्यत इत्येतद्व्येतरग्राहकं। त्वचस्यापि
ति। अपिना चक्षुष्मतः संग्रहः। अत एव विप्रकृष्टपदं सार्थकं अन्यथा यस्य विषयः दृष्टाविप्रकृष्टयोः साम्यात् विप्रकृष्टपदमनर्थकं स्या
दिति भावः। सर्वविषयत्वे सर्वविषयक ज्ञानजनकत्वमित्यर्थः। सर्वविषयकत्वेपि सर्वविषयकप्रतीतिजनकत्वेपीत्यर्थः। परतंत्रं इत
रणसापेक्षमित्यर्थः। तथा चान्धादेश्चक्षुष्मतोपि विप्रकृष्टघटादेर्न सहकारिणं विना मानसमिति भावः। इतरकारणमाह परमिति। राम
न त्वात्मा मनसा संयुज्यते मन इंद्रियेण इंद्रियमर्थेनेति प्रणाल्या ज्ञानजननात् मनश्चक्षुरादीन्द्रियमात्रपरतंत्रं न पुनः। सन्निकर्ष १०

के२ कू४

ध्यो२

सति१

परतंत्रंइतिकस्यचित्भ्रमंनिराकरोतिनपुनश्चक्षुरादिमात्रमितितथाउपस्थितिर्योगजधर्मादिसहकारिणामपेक्षाकदाचिदपि
चक्षुरादीनांनस्यादित्यर्थः।उपस्थित्यादीनांसहकारित्वंद्रढयतिस्मृतेति।अबा[redacted]ह्यवक्षुनिआत्माआत्मसमवेततत्समवेतेत्यर्थः।।
कार्यवाह्यनियोग्यानातिशेषः।अतएवतद्योग्यगुणाः इत्युक्तंनतुतद्गुणाइतिध्येयं।टीकाकृतनामनिर्देशादस्वरसः सूचितः।सचद्र
व्यसाक्षात्कारेसंख्यापरिमाणसाक्षात्कारस्यापिनियमात्परिमाणसंख्यासाक्षात्कारोप्यात्मनःसंभवतीत्यादिः।इत्यंआत्मनःआ
काशसमवेतगुणादीनांचमानसत्वेतणश्चेतिचकारेणतत्समवेतेचेत्यपत्वादिजातीनांतदभावानांचसंग्रहः।परात्मगुणानां
गुणादीनांपरस्यायोग्यत्वात्।परमाणौसावविषयत्वात्।चक्षुरयोग्यत्वात्।चाक्षुषज्ञानाविषयत्वात्।वक्ष्यमाणचाक्षुषसामग्र्यभा
वेनचाक्षुषाविषयत्वादितियावत्।चक्षुरादियोग्यद्रव्यान्यष्टच्छतिकिमितिचक्षुरादीनामित्यर्थः।तेनाष्टत्वगिंद्रियादेयोग्यानां

रु२ वे२ री२

भावा३ रूप२ उ१ ल३

नार्थांतरमिति ध्येयं।महदुद्भूतेति।तथाच द्रव्यचाक्षुषत्वावच्छिन्नं प्रति महत्त्वेन उद्भूतत्वेन च हेतुत्वादित्यर्थः।तथाच परमाणोश्चाक्षुषं प्रति
न्कृष्टकारणमहत्त्वबाधादेव नातिप्रसंग इत्याह परमाणुश्चेति।चाक्षुषत्वावच्छिन्नं प्रति उद्भूतरूपस्य हेतुत्वे मानमाह।आत्मादय
इति।तथाचात्मनि उद्भूतरूपान्नात्मा चाक्षुष इति भावः।ननु तथापि रूपवत्त्वेनैव चाक्षुषत्वावच्छिन्नं प्रति हेतुत्वोक्तावेवाँ चाक्षुषवा
रणोऽखिले रूपे कारणतावच्छेदकतया उद्भूतत्वप्रवेशेनेत्यत आह।पिशाचादय इति।जाति विशेष इति।स्वपरप्रकाशतावच्छेदको
जातिविशेष इत्यर्थः।एक इत्यनेनास्वरसः सूचितः।स च शुक्लत्वादिजातिसांकर्य्यरूपः।अथ शुक्लत्वादिव्याप्यं नानैवोद्भूतत्वं
इति चेत्।न।तदा द्रव्यचाक्षुषत्वावच्छिन्नं प्रति अननुगतानामुद्भूतरूपाणां कारणत्वासंभवादिति ध्येयं।अनुद्भूतत्वमिति।नीलत्वशु राम
क्लत्वव्याप्यतत्तदुद्भूतत्वाभावकूटवत्त्वमनुद्भूतत्वं अथवा तत्तत्शुक्लादिचाक्षुषप्रतिबंधकतावच्छेदकतयो सिद्धनानानुद्भूतत्व ११

रूपे२

तत्२

जस्य भावश्च कूटत्वं तच्चोद्भूतत्वमिति विनिगमनाविरहोऽस्वरसः अपरे त्वनेन सूचितः वक्ष्यतत्क्षरूपं साक्षात्करोमीत्यनुभवसाक्षिको विष
यताविशेषो रूपनिष्ठोद्भूतत्वं समवघटादिसमवेतगुणादिनिष्ठो न पिशाचादिरूपनिष्ठ इति तदुक्तमाभातीति त्वचक्षुर्ग्राह्यगुण
नाह योग्यगुणा इति चक्षुर्योग्यगुण इत्यर्थः योग्यपद्व्यं चाक्षुषद्रव्या तन्मात्रवृत्तिसंख्येत्युक्तमात्रपदफलमाह मात्रपदं चेति
घटाकाशसंयोगस्याकाशवृत्तित्वात्तन्मात्रवृत्तित्वमित्यर्थः इदानीं त्वगिन्द्रिययोग्यानद्रव्यादीनाह त्वचेति त्वचइव्यप्रत्य
क्षं प्रति महदुद्भूतस्पर्शवत्त्वेन कारणतायाः क्रमेण महत्त्वादेः फलमाहात्तेनेति विधिंदयत्रिपरमाणोर्वेति परमाणो न महत्त्वं
वायोर्नोद्भूतरूपं परमाणोर्नोद्भूतस्पर्श इत्यर्थः त्वचो योग्यगुणानाह गुणाश्चेति चक्षुषो योग्यास्त्वचो योग्या इति शेषः महदुद्भूतस्पर्शश्च
महत्त्वसामानाधिकरण्योद्भूतस्पर्श इत्यर्थः त्वचो योग्य इति शेषः अत एव चक्षुर्योग्यत्वविशेषणादेवानन्ववेवं चक्षुर्योग्यगुणारूपा

रूप२ त्वचोयोग्य२ दि२

त्वक्योग्यसमवेत इ

तिरिक्ताश्चेत्त्वचोयोग्यास्तदालोकपरिमाणद्रव्यस्वचाद्व्ह्येतामित्यत आह। नचेति उद्भूतस्पर्शवद्वृत्तित्वादिति। तथा च रूपातिरिक्ताश्चक्षु
र्योग्या उद्भूतस्पर्शवन्मात्रवृत्तयस्त्वचोयोग्या इति भावः। कर्म्मचेति। योग्यसमवेतं त्वक्योग्यसमवेतं त्वचोयोग्यमिति शेषः। योग्यव
क्तिगतं त्वचोयोग्यमिति शेषः। अत्र एवालोकगतकर्म्मणः ज्ञानत्वादिजातेश्च न त्वक्योग्यत्वमिति ध्येयं। समवाय इति त्वचोयोग्य
इत्यर्थः। मीमांसकास्त्विति लाघवात् द्रव्यस्पार्शनकारणतायां उद्भूतरूपाप्रवेशालाघवादित्यर्थः। तथा च तेषां मते द्रव्यस्पार्शनं प्र
ति उद्भूतस्पर्शत्वेनैव कारणतेत्यर्थः। लाघवाद्द्रव्यचाक्षुषत्वेतिति तथा च वहिरिंद्रियजन्यद्रव्यसाक्षात्कारत्वापेक्षया द्रव्यचाक्षुषत्व
४ इत्यर्थः। उद्भूतस्पर्शवन्मात्रेत्यत्र मात्रपदव्यावृत्तिमाह। नवा घटप्रभासंयोगादय इति त्वचोयोग्यतायां उद्भूतत्वस्य स्पर्शविशेष राम
णफलमाह तत्रेहीति। तत्र प्रदीपप्रभायां तथा च तत्रोद्भूतप्रभायां तथा च तत्रोद्भूतस्पर्शाभावान्न वृत्तिपरिमाणं नेत्त्वचोयोग्य ५४॥ १२

स्पलघुत्वादित्यर्थः॥ तद्धेतुत्वात्। उद्भूतरूपस्य हेतुत्वात्। आद्यइत्यनेनास्वरसः सूचितः। स च बहिरिंद्रियजन्यद्रव्यसाक्षात्कारत्वावच्छिन्नापे
क्षयाद्रव्यचाक्षुषत्वस्य लघुत्वेपि नोद्भूतरूपत्वादिना कारणत्वं तत्र उद्भूतत्वस्य पाकावयवजन्यतावच्छेदकजातिभ्यां सांकर्यात्। अत
एव द्रव्यस्पार्शनत्वावच्छिन्नं प्रति नोद्भूतस्पर्शत्वेनापि कारणता। अत्र नव्याः। द्रव्यमानसेतरजन्यसाक्षात्कारत्वावच्छिन्नं प्रतिज
नकतावच्छेदकतया सिद्धं तत्तद्रव्यगतैकत्वगतोद्भूतत्वेनैव कारणता न चैवं कारणतावच्छेदकोद्भूतत्वजातिः परिमाणगतैव कल्प्य
तामिति वाच्यं। महत्वादिजन्यतावच्छेदकजातिभिः संकरात्। नापि पृथक्त्वादिगता तस्यावधिज्ञानज्ञाप्यत्वेन विलंबोपस्थितिकत्वा
त्। तत्र बहूनां विवादाच्च। अत एव परत्वापरत्वगता। ततश्चान्यस्यापि द्रव्यस्योपगमात्। एकत्र परत्वापरत्वद्वयसांसत्वेन नावच्छेदकजा
तिकल्पने गौरवाच्च। नापि स्थितिस्थापकगता। तस्यातींद्रियत्वेन विलंबोपस्थितिकत्वात्। पृथिव्यामेव कैश्चित्तत्स्वीकारात्। जला

दिजन्यतावच्छेदक

दिवहिर्द्रव्येतत्सत्वेवहूनांविवादाद्यानवावेगविभागगतावहुषुतत्कल्पनेगौरवात्।अन्यतरकर्म्मोभयकर्म्मजातिभ्यांसंकराद्वा।अत
एवनसंयोगगता।एकत्रवहुषुसंयोगेषुतत्कल्पनेगौरवाच्च।नापिकर्म्मगता।नोदनादिजन्यतावच्छेदकजातिभिःसंकरात्।निष्क्रिय
स्यापिद्रव्यस्योपगमात्।एकत्रवहूनांकर्म्मणांतत्कल्पनेगौरवाच्च।इत्थंचवास्वैकत्वेनसाजातिःकल्प्यतइतिनस्पार्शनोवायुः।नचैवं
प्रभापिनचाक्षुषीस्यात्।तदैकत्वस्यतादृशजातिरहितत्वात्।अन्यथातस्याअपिस्पर्शनापत्तेरितिवाच्यं।कार्य्यतावच्छेदकावच्छिन्नं
हितत्रजायतएवस्पार्शनत्वचाक्षुषत्वादिविशेषधर्म्मावच्छिन्नेतुस्पर्शविशेषरूपविशेषस्यैवनियामकत्वात्।यदिचमानसेतरत्ववि
शिष्टजन्यद्रव्यसाक्षात्कारत्वेनजन्यद्रव्यसाक्षात्कारत्वविशिष्टमानसेतरत्वादिनावाजन्यत्वमित्यत्रविनिगमकाभावःसंभाव्यतेतदासां
द्रव्यचाक्षुषत्वस्पार्शनत्वएवतादृशैकत्वजन्यतावच्छेदकेलाघवात्।तथापिनप्रत्यक्षोवायुरित्यत्रविस्तरः।इत्याहुः।समवायातीन्द्रि

यत्तु वादिनां मतं दूषयितुमुत्थापयति वैशेषिकाणां समवायेति न प्रत्यक्षो नेंद्रियमात्रजन्यप्रत्यक्षविषय इत्यर्थः। न च समवाय
स्येति। तथा च समवायस्यैकत्वात्तस्य च परमाणुसाधारण्यादिति भावः। तथा हेतुतायामिति संबंधप्रत्यक्षं प्रति यावदाश्रयप्रत्य
क्षेण हेतुतायां मानाभावादिति। तद्धर्मावच्छेदेन तस्यान्वयव्यतिरेकाभावादित्यर्थः। ननु योग्यमात्रसमवेतगुणत्वेन योगात्त्ववा
युस्पर्शेऽपि स्पार्शनो न स्यादत आह। किं चेति। गौरवादिति। संबंधप्रत्यक्षस्य गुरुत्वेन कार्यतानवच्छेदकत्वात्। लाघवात्संयोगप्र
त्यक्षत्वमेव कार्यतावच्छेदकं तत्प्रत्यक्षे यावदाश्रयप्रत्यक्षस्य हेतुत्वादिति भावः। घ्राणेंद्रिययोग्यान्वक्तुमाह। घ्राणयोग्य इति
। उद्भूत एव उद्भूतगंधे महत्त्वसामानाधिकरण्यविशेषणं देयं गंधे उद्भूतत्वविशेषणफलमाह। नवेति। रसनयोग्यगुणानाह। रस
नयोग्य इति। तिन रसे महत्त्वसामानाधिकरण्यविशेषणं न रसे उद्भूतत्वस्य विशेषणाद्व्यावृत्तिमाह। नवेति। श्रवणयोग्यगुणादीन्

ह्यश्रवणायोग्य इति। न ह्यनायातिशद्गगतायातिसंक्षेप इति। द्रव्यग्राहकं घ्राणरसनश्रवणमिव अनुपलब्ध्याख्ये अभावग्राहकमप्यतिरि
क्तं परेषां प्रमाणमस्ति नच्च निस्तारभियात्रोद्दकपतिखंडितमित्यादि संक्षेपार्थः। प्रसंगात्सन्निकर्षं त्रिरूपयितुं प्रणालीमाह तत्स
चेति। शब्देतरेति। उपलक्षणं चैतत्। योग्यत्वेनापि जातिर्विशेषणीया। नातो गुरुत्वत्वभावनात्वग्रहः। कर्मगतजातिरप्युपलक्षणं।
जन्यघटादिद्रव्यगतघटादिजातेरपि चक्षुःसंयुक्तकपालसमवेतघटसमवेतत्वेन ग्रहसंभवात्। विशेषणतयेति। भावाभाव
साधारणी अतिरिक्तैव विशेषणतेति भावः। इंद्रियविशेषणतेति। इंद्रियेविशेषणतेति सप्तमीसमासः। इदमेव दर्शयति। इंद्रि
यरूपे श्रवणे इति। नच्चितिनप्रत्यासत्तिः इंद्रियेण द्रव्यग्रहेन सन्निकर्ष इत्यर्थः। इदमेव स्फुटयति संयुक्तेति इंद्रियसंयुक्ते इत्यर्थः। आ राम २४
त्मनीति तथा च द्रव्यसाक्षात्कारत्वावच्छिन्नं प्रति इंद्रियसंयोगत्वेन हेतुत्वात्। संयोगस्य सन्निकर्षत्वं दुर्वारमिति भावः। संक्षेप इति।

भवत्वेवं संयोगः कश्चित्सन्निकर्षः तथापि चक्षुःसंयोगादीनां सन्निकर्षत्वे मानाभावात् । तथा हि द्रव्यसमवेतचाक्षुषत्वावच्छिन्नं प्रति चक्षुः
संयुक्तसमवायत्वेनैव हेतुत्वं रूपादिचाक्षुषानुरोधेनावश्यं वाच्यं तथा च तत्रैव प्रत्यासत्त्या घटादिद्रव्यचाक्षुषोपपत्तौ ऽयं घटादिद्
व्यचाक्षुषे चक्षुःसंयोगहेतुत्वे न मानाभावात् । भवतां कपालचक्षुःसंयोगोत्तरं घटोत्पत्तिद्वितीयक्षणे घटप्रत्यक्षानंगीकार इव ममा
पि कपालविमर्शदशायां घटचक्षुःसंयोगोत्पत्त्या घटप्रत्यक्षानंगीकारेपि क्षत्यभावात् । न चात्मप्रत्यक्षानुरोधात् द्रव्यसाक्षात्कारत्वा
वच्छिन्नं प्रति इंद्रियसंयोगत्वेन हेतुत्वकल्पनाच्चाक्षुषं प्रति चक्षुःसंयोगस्यापि हेतुत्वमावश्यकमिति मणिकृदुक्तं युक्तं इंद्रियस्यानु
गतस्याभावेन मानाभावेन च तादृशकार्यकारणभावस्याभावात् । आत्ममानसानुरोधेन चैवं विशिष्यैव द्रव्यमानसत्वावच्छिन्नं प्रति आ
त्ममनोयोगत्वादिना इंद्रियसंयोगस्य हेतुत्वात् । न च पिशाचस्य तद्रूपादेश्च चाक्षुषत्वप्रसंगः । द्रव्यसमवेतचाक्षुषं प्रति सामानाधि

करणप संबंधेनोद्भूतरूपस्यापि हेतुत्वात् महत्त्वे तद्द्रव्यसाक्षात्कारत्वावच्छिन्नं प्रत्येव समवायेन हेतुः द्रव्यान्यद्रव्यसमवेतसाक्षात्कारं प्रति
च सामानाधिकरण्येन हेतुरिति न द्व्यणुकस्य तद्रूपादेर्वा साक्षात्कार इति उभयमतेप्येतस्य समाधेयत्वाच्चेति द्रष्टव्यं । इत्थं च त्रसरेणुप्रत्य
क्षानुरोधात् द्व्यणुकसिद्धिरप्यावश्यकीति मंतव्यं । न चैवं परमाणुघटितसन्निकर्षेण द्रव्यत्वसत्त्वादीनां चाक्षुषापत्तिः घटादिमादाय सा
मानाधिकरण्येनोद्भूतरूपमहत्त्वादीनां तत्र सत्त्वादिति वाच्यं । जातिचाक्षुषत्वावच्छिन्नं प्रति समवेतमद्भिन्नचाक्षुषत्वावच्छिन्नं प्रति
वा चाक्षुषत्वेन कारणता आश्रयचाक्षुषस्य तत्र कार्यैदिशि विषयत्वं संबंधः कारणतादिशि च स्वविषयसमवेतत्वं संबंध इति नाश्रय
चाक्षुषं आश्रयनिर्विकल्पकानंतरमेव च जातिनिर्विकल्पकांगीकारात् उभयसमाधेयत्वाच्चेत्यलं चक्षुःसंयोगस्य कारणत्वेनेति संक्षे राम
पार्थ इति न्यायः । तत्र ऋजवस्तु द्रव्यचाक्षुषत्वावच्छिन्नं प्रति लाघवात् चक्षुःसंयोगत्वेन हेतुत्वं । न तु द्रव्यतत्समवेतसाधारणं चक्षुःसंयु १५

क्तसमवायस्यहेतुत्वंतथासतिभवतांपरमाणुघटितसन्निकर्षेणपृथिवीत्वादिप्रत्यक्षवारणायजातिचाक्षुषत्वावच्छिन्नंप्रतिआश्रय
चाक्षुषत्वेनहेतुत्वकल्पनेद्रव्यसमवेतचाक्षुषंप्रतिउद्भूतरूपवत्त्वेनद्रव्यान्यद्रव्यसमवेतसाक्षात्कारत्वावच्छिन्नंप्रतिचमहत्त्वेनसामा
नाधिकरण्यप्रत्यासत्त्याहेतुत्वंवाच्यमितिकार्य्यतावच्छेदकधर्मस्यजनकतावच्छेदकसंबंधस्यगौरवंदुःस्परिहरंममतुपरमाणु
घटितसन्निकर्षेणपृथिवीत्वादिप्रत्यक्षजातिप्रसंगवारणायद्रव्यान्यद्रव्यसमवेतचाक्षुषत्वावच्छिन्नंप्रतिआश्रयचाक्षुषत्वेनजा
तिचाक्षुषंप्रतिहेतुहेतुद्रव्यचाक्षुषंप्रतिउद्भूतरूपत्वेनद्रव्यसाक्षात्कारत्वावच्छिन्नंप्रतिआश्रयचाक्षुषत्वेनजातिचाक्षुषंप्रति
हेतुहेतुद्रव्यचाक्षुषंप्रतिउद्भूतरूपत्वेनद्रव्यसाक्षात्कारत्वावच्छिन्नंप्रतिमहत्त्वेनहेतुत्वमिति।कार्य्यतावच्छेदकधर्मसंबंधयो
र्लाघवमिति।जातिचाक्षुषत्वावच्छिन्नंप्रत्याश्रयचाक्षुषस्यहेतुत्वंगाकारोद्रव्यचाक्षुषंप्रतिनसंयुक्तसमवायेनहेतुतायांपर्य्य

वस्यति।किंतुचक्षुःसंयोगस्यैवेत्याङ्कः।वक्तृतोमहत्वकार्य्यतायोद्रव्यान्यत्वमपिनविशेष्यंतुटावेवविज्ञामादिति।किंतुटिमादायातिप्रसं
गवारणायद्रव्यान्यत्वेनेति।तत्वं।प्रसंगात्चक्षुःसंयुक्तसमवायचक्षुःसंयुक्तसमवाययोर्हेतुत्वंप्रत्यक्षेनिरस्यति।तथाहिद्रव्यलौकि
कचाक्षुषंप्रतिचक्षुःसंयोगएवसन्निकर्षोपेक्षा।किंद्रव्यान्यद्रव्यसमवेतसमवेतयोर्लौकिकचाक्षुषंप्रतिचक्षुःसंयुक्तमहदुद्भूतरूप
वत्समवायचक्षुःसंयुक्तमहदुद्भूतरूपवत्समवायचक्षुःसंयुक्तमहदुद्भूतरूपवत्समवेतसमवाययोःसन्निकर्षत्वेनानचविनि
गमनाविरहःद्रव्यचाक्षुषानुरोधेनउक्तलाघवेनचचक्षुःसंयोगस्यहेतुत्वावश्यकत्वात्।नचैवंनिमीलितनयनस्यगुणादित्तत्सम
वेतजात्योश्चाक्षुषापत्तिरितिवाच्यं।द्रव्याविषयकगुणादिचाक्षुषस्यालीकत्वया।द्रव्यचाक्षुषसामग्रीविरहादेवतदापत्तिविरहादि राम
ति।अत्रसांप्रदायिकाः।चक्षुःसंयुक्तमहदुद्भूतरूपवत्समवायस्यासन्निकर्षत्वेचक्षुःसंयुक्तघटादेश्चाक्षुषोत्पाददशायांघटादिगुण १६

कर्म्मजातिष्वव्याप्तेर्निकृष्टपरादिगुणकर्म्मजातिष्वपि लौकिकविषयितासंबंधेन चाक्षुषापत्तेर्दुर्वारत्वात्तान्नवाश्रयाविषयकगुणादि
चाक्षुषस्यालीकतया तत्र पटप्रत्यक्षसामग्रीविरहात् न तद्वृत्तिगुणादेश्चाक्षुषमिति वाच्यं तावता पटवृत्तिगुणचाक्षुषत्वेनापत्त्यसंभवे
पि पटवृत्तिगुणादौ लौकिकविषयतया चाक्षुषसामान्यापत्तेर्दुर्वारत्वात् तत्पटाविषयकस्यापि चाक्षुषस्य तत्र प्रसिद्धत्वात् एवं चक्षुः
संयुक्तमहदुद्भूतरूपवत्समवेतसमवायस्यासन्निकर्षत्वेपि चक्षुःसंयुक्तघटादेश्चाक्षुषोत्पत्तिदशायां असन्निकृष्टद्रव्यवृत्तिगुण
दिमात्रसमवेतजातौ परमाण्वादिवृत्तिगुणमात्रसमवेतजातौ च लौकिकविषयतया चाक्षुषोत्पादो दुर्वार इति सिद्धांतानुयाजिनः
उक्तानाक्रांतजातिलौकिकचाक्षुषं प्रति स्वविषयसमवेतत्वसंबंधेनाश्रयलौकिकचाक्षुषमेव हेतुर्लाघवात् इति नासन्निकृष्टपटगु
णादिमात्रसमवेतजातिचाक्षुषं न तद्द्रव्यान्यद्रव्यसमवेतसमवेतयोर्लौकिकचाक्षुषं प्रति चक्षुःसंयुक्तमहदुद्भूतरूपवत्समवेतसम

वायय्योःसन्निकर्षयोर्हेतुत्वात्तत्त्वतयोर्हेतुत्वेतद्वलेनद्रव्येपिद्रव्यान्यद्रव्यसमवेतविषयकचाक्षुषापत्तिवारणायद्रव्यान्यविषयकसाक्षात्का
रंप्रतिद्रव्यभेदस्यहेतुत्वावश्यकत्वेन।एवंद्रव्यतन्मात्रसमवेतजातिष्वपिद्रव्यान्यद्रव्यसमवेतसमवेतविषयकचाक्षुषापत्तिवारणा
यद्रव्यान्यद्रव्यसमवेतसमवेतविषयकप्रत्यक्षंप्रतिसमवेतत्वसंबंधेनद्रव्यान्यस्यचहेतुत्वावश्यकत्वेनचकार्य्यकारणभावचतु
ष्टयकल्पनापत्तेः।एवंगुरुत्वस्थितिस्थापकत्वत्वरसत्वगंधत्वस्पर्शत्वानांनद्व्याप्यजातीनांचचाक्षुषापत्तिवारणायसमवेतत्व
विशिष्टलौकिकविषयतासंबंधेनचाक्षुषोत्पत्तिंप्रतितादात्म्यसंबंधेनगुरुत्वान्यसमवेतत्वस्थितिस्थापकान्यसमवेतत्वगंधान्य
समवेतत्वस्पर्शान्यसमवेतत्वादिनाकार्य्यकारणभावपंचकांतरकल्पनापत्तेश्च।जातिचाक्षुषंप्रतिआश्रयचाक्षुषहेतुत्वेचआश्रय राम
चाक्षुषभावादेवनैतेषांचाक्षुषापत्तिः।केवलव्यक्तिविषयकनिर्विकल्पकानंतरमेवजातिनिर्विकल्पकंततोजातिविशिष्टप्रत्यक्षंइ १७

त्वस्योपगमात्त्वानाश्रयचाक्षुषस्यजातिचाक्षुषेव्यभिचारः।नचतथापिचक्षुःसंयुक्तघटादेश्चाक्षुषोत्पाददशायांअसन्निकृष्टपटादिवृ
त्तिगुणकर्मण्यपिलौकिकविषयतासंबंधेनचाक्षुषोत्पत्तिवारणायचक्षुःसंयुक्तमहदुद्भूतरूपवत्समवायलक्षणसन्निकर्षस्यका
रणत्वमावश्यकमितिवाच्यं।व्यासज्यवृत्तिगुणचाक्षुषंप्रतिस्वाश्रयसमवेतत्वसंबंधेनचक्षुःसंयोगाभावस्यप्रतिबंधकत्वमावश्य
कं।तस्यप्रतिबध्यतावच्छेदकंनगुणचाक्षुषत्वंव्यासज्यवृत्तिगुणचाक्षुषत्वंकिंतुगुणकर्मचाक्षुषसाधारणंद्रव्यान्यसच्चाक्षुषत्व
मेवयावदाश्रयचक्षुःसंयोगंविनापिद्रव्यस्यद्रव्यत्वादिजातेश्चचाक्षुषोदयात्तद्बहिर्भावः।द्रव्यान्यसत्त्वंचप्रतिबध्यतावच्छेदकत
यासिद्धोगुणकर्मवृत्तिजातिविशेषः।नचैवंद्रव्यान्यसच्चाक्षुषत्वस्यहंलौकिकविषयतासंबंधेनअतीतानागतगुणकर्मणिद्रव्य
द्रव्यत्वजातौचस्यात्।निरुक्तप्रतिबंधकाभावस्याविशिष्टत्वादितिवाच्यं।द्रव्यान्यसत्त्वस्यहंप्रतितादात्म्यसंबंधेनद्रव्यान्यत्वेनापिक

रणत्वात्। भवतां गुणचाक्षुषत्वादेः प्रतिबध्यतावच्छेदकत्वेपि निरुक्तप्रतिबंधकाभाववत्त्वेन द्रव्यादौ गुणचाक्षुषापत्तिवारणाय गुण
चाक्षुषादिकं प्रति गुणत्वादिना कारणत्वावश्यकत्वेन तत्कल्पत्वात्। एवं निरुक्तप्रतिबंधककाले द्वित्वादौ द्रव्यान्यसच्चाक्षुषोत्पत्त्यसं
भवेपि चाक्षुषसामान्यस्य जातिविषयतया प्रसिद्धस्य वारणाय जातिचाक्षुषं प्रति जातित्वेनापि कारणत्वात्। तत्र गुणादिचाक्षु
षस्य प्रतिबध्यतावच्छेदकत्वेपि संयोगद्वित्वादौ चाक्षुषसामान्यस्य गुणान्यद्रव्यविषयकस्य वारणाय गुणादिभिन्नविषयकचा
क्षुषं प्रति गुणादिभेदस्य कारणस्यावश्यकत्वेन तत्कल्पत्वात्। न चैवं चक्षुःसंयुक्तत्वमहदुद्भूतरूपवत्समवायस्य सन्निकर्षत्वे चक्षुःसं
युक्तपरमाणौ पिशाचादेर्गुणकर्मणोश्चाक्षुषापत्तिर्निरुक्तप्रतिबंधकाभावसत्त्वादिति वाच्यं। जातिचाक्षुषं प्रति स्वविषयसमवेतत्व राम
संबंधेन यदाश्रयचाक्षुषस्य कारणत्वं तस्यैव कार्य्यतावच्छेदकं न जातिचाक्षुषत्वं किंतु द्रव्यान्यसमवेतचाक्षुषत्वमतः परमाण्वादिगुण १८

कर्म्मणोर्नचाक्षुषोपपत्तिः।जातिचाक्षुषवत्तरूपादीनांकर्म्मणांचचाक्षुषमपिन।अथचाक्षुषंविनायद्वाभ्यांसज्यवृत्तिगुणचाक्षुषं
प्रतिस्वाश्रयसमवेतत्वसंबंधेन।अथचाक्षुषाभावस्यप्रतिबंधकमावश्यकंतस्यैवप्रतिबध्यतावच्छेदकंनच्यासज्यवृत्तिगुणचा
क्षुषत्वंअपितुसामान्यतोद्रव्यान्यसद्वाक्षुषत्वमपिनपरमाणुसमवेतगुणकर्म्मणांचाक्षुषोपपत्तिः।नचस्वनाशकालीनचक्षुः
संयोगजन्या।अथचाक्षुषेसतिपटादिभिन्नेद्रव्येचक्षुःसंयोगेविद्यमानेजातिचाक्षुषवारणमयचक्षुःसंयुक्तसमवायस्यसन्नि
कर्षत्वमावश्यकमितिवाच्यं।तदानींतादृशजातिचाक्षुषस्येष्टत्वात्द्रव्यचाक्षुषंप्रतिचक्षुःसंयोगस्यजातिचाक्षुषंप्रतिचअ
यचाक्षुषस्यचकार्य्यसहवर्त्तित्वेनहेतुत्वाभ्युपगमादपितद्वारणसंभवाच्चेत्फलंचचक्षुःसंयुक्तसमवायचक्षुःसंयुक्तसमवेतसमवा
ययोःहेतुत्वगवेषणेनेतिदिक्।स्यादेतद्दिति।परमाणोमहत्वंनास्तीतिप्रत्ययात्।परमाणौचक्षुःसंयोगस्यैवअत्रघटेआलोकोन।

स्तीतिप्रत्ययात्।अंधकारस्थघटेआलोकाभावग्रहानुरोधात्।चक्षुःसंयुक्तविशेषणतायाघटकत्वेनचक्षुःसंयोगोंऽधकारस्थघटेप्यस्तीतिभा
वः।चक्षुषाद्यग्रहइति।आलोकपरमाणुसंयोगान्नाध्यक्षमित्यालोकेमहत्वविशेषणं।अनुद्भूतरूपवतेप्यालोकस्यचक्षुरादिरूपस्य
संयोगस्यसत्वेपिनाध्यक्षमिति।उद्भूतरूपवत्वंआलोकविशेषणमित्यर्थः।सोपिमहदुद्भूतरूपालोकसंयोगोस्तीत्याशंकतेप्रदीपइति।
दृश्यतिमणीति।तत्रभावात्।तेजोंतरसंयोगाभावात्।प्रभाप्रत्यक्षेप्रभांतरसंयोगस्याहेतुत्वमानमाह।दृश्यतेचेति।पुनःशंकते
अथेति।स्ववर्णेति।आलोकत्वंस्ववर्णत्वादिव्यापकमितिभावः।नन्वित्यादिनाबाधकशंकतेसमाधानमाह।अत्रोच्यतइति।आलोकाका
शसंयोगस्येति।तथाचालोकेवृत्तिसंयोगत्वेनकारणता।आलोकसंयोगस्येतिभावः।नचैवमिति।स्ववर्णस्याप्यालोकत्वमितिभावः।अ राम
नभिभूतेति।रूपेउद्भूतत्वस्येवअनभिभूतत्वस्यापिविशेषणत्वादुद्भूतानभिभूतत्वस्यापिविशेषणत्वादुद्भूतानभिभूतरूपवन्महदालो १९

कसंयोगत्वेन हेतुत्वादिति भावः॥ द्रव्यांतरेति॥ अंधकारस्य घटसुवर्णसंयोगे नष्टे द्रव्यहापत्तेरित्यर्थः॥ सुवर्णभिन्नमिति॥ सुवर्णेतरतेजो
भिन्नद्रव्यं सुवर्णं तेजोभिन्नद्रव्यं चेति॥ द्रव्यांतरग्रह आलोकसंयोगद्वयसुवर्णग्रहेप्यालोकापेक्षेति भावः॥ अत्र संप्रदायविद इत्यने
नकार्य्यतावच्छेदकगौरवमेवास्वरसः सूचितः॥ न च आलोकसंयोगस्य लाघवात् महाप्रभापत्त्येषभावत्त्रिसंयोगेनैव कारण
तानतउद्भूतानभिभूतरूपमहदालोकसंयोगत्वेन गौरवात् तत्प्रभाद्वर्णसुवर्णादिव्यावृत्तिजातिविशेषः॥ इति नांधकारे सुवर्णा
चाक्षुषप्रमापत्त्येप्रभाचक्षुःसंयोगे नैव प्रमाहत्तिसंयोगकारणतानिर्वाहादिति शाङ्क्यः॥ न त्वेवं तादृशआलोकसंयोगावच्छेद
कानवच्छिन्नचक्षुःसंयोगे विद्यमानेपि न घटादेः प्रत्यक्षमित्याशंकते॥ तथापीति॥ परस्योपरदिगवच्छेदेन तदसंयुक्तस्य आलोकासंयु
क्तस्य॥ परदिगवस्थितपुरुषे परदिगवच्छेदेन चक्षुःसंयुक्तेनेति शेषः॥ यदवच्छेदेनेति॥ तथाचालोकसंयोगावच्छेदकावच्छिन्नचक्षुःसं

योगत्वेनहेतुत्वंमूर्त्तयोःसमानदेशताविरोधश्चनिविडयोरेवेत्यतोःनदोषःकिंवोभयोरेकमात्रसंबंधेननविरोधः॥किंतुवृत्तिनियाम
कसंबंधेनवृत्तावेवेतिध्येयमितिभावः।नचैवमालोकसंयोगस्यकारणतावच्छेदकत्वाकारणत्वाउपपत्तिरितिवाच्यं।आलोकसंयोगा
वच्छिन्नचक्षुःसंयोगस्यैवविनिगमकाभावेनचक्षुःसंयोगावच्छिन्नालोकसंयोगत्वेनापिहेतुत्वेनद्वयोर्हेतुत्वसंभवात्।आलोकादिसं
योगावच्छिन्नत्वंतुस्वरूपसंबंधविशेषइतिध्येयं।अत्रकेचित्तुचाक्षुषत्वावच्छिन्नंप्रतिआलोकसंयोगत्वेनहेतुत्वंविनालोकसंयोगंत
मसिविडालादेःसांजननेत्रादेश्चद्रव्यचाक्षुषोदयात्।नचविडालादिचक्षुष्येवआलोकांतरमस्तीतिचक्षुःसंयोगदशायांआलोक
संयोगस्यापिसंभवात्इतिवाच्यं।तथासत्यंधकारेविडालादेरिवनिरंजनपुंसोपिद्रव्यचाक्षुषापत्तेः॥विडालचक्षुःसंयोगसांजनपुरु
षचक्षुःसंयोगादेवआलोकसंयोगस्यापिनिर्वाहात्।नचविडाला(दीनांअंधकारेद्रव्यचाक्षुषादिदशायांपुरुषांतरस्यतद्द्रव्येचक्षुःसं

योगेमानाभावादितिवाच्यं।तद्व्येऽंधकारप्रत्यक्षानुरोधेनचक्षुःसंयुक्तविशेषणतानिर्वाहायावश्यंचक्षुःसंयोगोऽस्तीत्यावेदितं।प्रागेवेत्या
ऽ।तत्तत्तत्तत्तमानुषीयद्रव्यचाक्षुषत्वावच्छिन्नंप्रत्येवआलोकसंयोगस्यहेतुत्वात्इतिसंप्रदायः॥नव्यास्तुमानुषीयविजातीयचाक्षुष
त्वावच्छिन्नंप्रतिआलोकसंयोगत्वेनएवंविजातीयमानुषत्वावच्छिन्नंप्रतिअंजनसंयोगत्वेनकारणतावैजात्यंआलोकसंयोगादि
जन्यतावच्छेदकंचाक्षुषत्वव्याप्यंयद्वामानुषीयद्रव्यचाक्षुषत्वावच्छिन्नंप्रतिअंजनाभावविशिष्टालोकसंयोगाभावत्वेनप्रतिबंध
कत्वात्तदभाववत्वेनैवकारणतातोऽंजनाभाववैशिष्ट्यंआलोकसंयोगाभावेअंजनसंयोगेचक्षुःसंयोगित्वसंबंधावच्छिन्नप्रतियो
गिताकाभावीयविशेषणतावत्त्वविशेषणत्वरूपंसामानाधिकरण्यंएवविशिष्टाभावःसत्यालोकसंयोगेअंजनसंयोगेचेतिना
नालोकसंयोगस्यालोकसंयोगत्वेनहेतुताकिंतूक्तरूपेणेतिप्राहुः॥स्यादेतदिति।विशेषणताप्रत्यासत्तिःप्रविकृष्टार्थग्रहणनि

सि·दी
२२

यमादेव सत्त्वसन्निकृष्टार्थे समवायाभावे मानाभावात् । न संभवतीति विशेषणभान प्रत्यासत्तिरिति भावः ॥ समवाये मानमाह अयं घट इति । तथा च ईदृशविशिष्टानुभवे विशेषणविशेष्यसंबंधस्यापि विषयीकरणात् तस्य च संबंधेन इतरसंबंधबाधात् समवाय एवेति भावः ॥ नन्वितरसंबंधबाध एवासिद्ध इतीतरसंबंधेनैवायं विशिष्टप्रत्यय इत्यत आह । नहीति । दूषयति । स्वरूपेति । तथा च स्वरूपसंबंध एव घटत्वरूपचलनाद्याधाराधेयभावनियामकोस्तु किं समवायेनेति भावः ॥ नहीति । तथा च समवायस्यैव आधारतात्वे पटेपि घटत्वविशिष्टबुद्ध्यापत्तिरिति भावः ॥ इदमेव विषदयति । एकएव हीति । समवायाभावं साधयति मैवमित्यादि । घटे घटत्वमिति । तथा च समवायाकारानुगतमतेरेव समवाये प्रमाणत्वात् । अत्र नव्याः ॥ इदमापाततस्तावत् साधारणसमवायत्वैक्येनानुगतमतेः संभवात् । तावत्क्लृप्तक्लृप्तलाघवात् समवायसिद्धिः । तथा हि विलक्षण । विलक्षणचित्रत्वावच्छिन्नं प्रति नीलत्वेन पीतत्वेन शुक्लत्वेन कृष्णत्वेन कारणता सर्वचि राम
९१

त्रसाधारणव्यापकचित्रत्वंतत्प्रतिबंधकतावच्छेदकतयैवसिद्ध्यति।अन्यथातत्तत्चित्रोत्पत्तिकालेनीलत्वेनापिकार्य्यकारणभावात्।नी
लसामग्र्याअविद्यमानत्वात्चित्रोत्पत्तिकालेनीलादेरुत्पत्त्यापत्तेःकार्य्यसहवर्त्तित्वेनचित्रत्वेनैवप्रतिबंधकत्वात्तत्प्रतिबंधकता
वच्छेदकतयासर्व्वचित्रसाधारणव्यापकचित्रत्वजातिसिद्धिः।एवंचतत्प्रतिबध्यतावच्छेदकंचित्रेतररूपत्वंतत्रएकःसमवायप
वप्रतिबध्यतावच्छेदकःसंबंधोस्तीतिकल्प्यते।लाघवादन्यथानीलादीनांस्वरूपसंबंधस्यप्रतिबध्यतावच्छेदकसंबंधेऽनंतप्रति
बध्यप्रतिबंधकभावापत्तेरितितत्त्वमित्याह।अभावेत्यप्रमाणमाहनवेति।अभावस्याप्रामाणिकइत्यर्थः।घटोनास्तीतितथाचनास्तीति
किंतत्प्रतीतिविषयतयाअतिरिक्ताभावसिद्धिरित्यर्थः।नतुस्वभावोभवतुप्रतीतिसिद्धतयाप्रामाणिकस्तथापितस्यघटपदार्थाति
रिक्तत्वेमानाभावादित्याशंकते।अत्रप्राभाकराइति।अधिकःषट्पदार्थाधिकइत्यर्थः।अत्रशंकतेनन्वित्यादिनाइदंअभावप्रति

सि·टी· तिविषयीभूतं अभावेन अतिरिक्ताभावेनेत्यर्थः॥ शंकां निरस्यति यत्रेति॥ अभावो अभावाधिकरणतेत्यर्थः॥ यत्र भूतले घटस्तत्रापि कदाचिद्घटाभाव
२२ स्य सत्त्वात्॥ यथाश्रुतासंगतेः प्राभाकरं दूषयति अत्रोच्यत इति॥ भूतले भूतलमिति॥ तथा चाभेदे आधाराधेयभावबाधादित्यर्थः॥ ननु मास्तु एकधर्मावच्छि
न्नाधाराधेयभावो अभेदे तथा च भूतलत्वावच्छिन्नाधारता च मास्तु॥ किंतु तस्यैकस्यैव भूतलस्य भूतलत्वावच्छिन्नाधिकरणता अभावत्वेन वाधे
यता चास्तु॥ अपि चाभेदेप्याधाराधेयभावो घटाभावे घटो नास्तीति प्रत्ययानुरोधात्कल्प्यते इह तु भूतले भूतलमित्यनुभवाभावान्नाधारा
धेयभावो भूतलत्वेनेत्यत आह॥ किंचेति॥ आद्ये तद्भूतलस्य घटाभावत्वात् इदानीमिहेति शेषः॥ नन्वतिरिक्ताभाववादिमतेपि तस्मिन् भूतले घ
टे आनीते घटाभावो न गच्छति न वा नश्यतीति कथं न तत्र घटाभावप्रत्यय इति अत्र तत्राधिकरणतातिरिक्ताभावोत्पादविनाशशालिनी राम
तिन घटवति घटाभावप्रत्यय इति चेत्तत्रद्वोद्धोत एवात्र नः शरणमित्यत आह॥ किंच कपाल इति॥ सर्वदेति कपालकालमात्रे इत्यर्थः॥ अन्यथाक २२

पालनाशकाजेकपालासत्वेन सर्वदित्यस्यानर्थक्यापत्तेरितिभावः। अन्यथा कपालासत्वेन तत्राप्युत्पत्त्यंताभावस्थलोक्तैव गतिः। अधिकरणतायां उत्पा
दविनाशशालिन्याः संभवेनैव दोषपरिहारसंभवादत आह किंचेति। तथा च साध्यतेति। एवं च तदर्थध्यानधारणासमाधिकृतं दुःखं कोपि नानुभवे
दितिभावः। संक्षेप इति। इदं चापाततः। अनतिरिक्ताभाववादिमते मोक्षाधिकरणतायाः एव साध्यत्वाद्युक्ताप्यनुपपत्तिः। महं मते तु नित्यसुखा
भिव्यक्तेरेव भावरूपमोक्षत्वात्। तस्य च साध्यत्वात्। स च स्वत एव साधुरित्यलं पल्लवितेन। एवमभावस्याधिकरणादतिरिक्तत्वे इष्टापत्त्या परिह
रति। स्यादेवेति। अनवस्थां निरस्यति। केवलेति। अत्रेष्टापत्तौ दूषणमाह। अभवदुक्तेति। मोक्षादेव साध्यतापत्तिदोषप्रसंगादित्यर्थः। अत्राद्य
इति। घट एव नाधिकरणरूप इत्यर्थः। तत्सत्वे घटसत्वे तथा च लाघवात् घटाभावाभावो भाव इत्यर्थः। केवलाधिकरणेति। अधिकरणेत्य
र्थः। उक्तयुक्तेरिति। आधाराधेयभावानुपपत्तेः। अधिकरणाभावयोर्भवन्मते भेदादित्यर्थः। संप्रदाय इति। अत्राभावस्य प्रतियोग्यात्मकत्वेन।

सि॰टी॰ २३ स्तीतिनिषेधप्रत्ययोनस्यात्।स्यात्त्वघटोऽस्तीत्येवमिति।किंचाभावोऽधिकएवप्रतियोगिसमनियतःसर्वत्रलाघवात्तन्नतुप्रतियोग्यात्मकत्वंगौ
रवादितिदिक्।बाधकेतिप्रमात्वेबाधकाभावादित्यर्थः।अनवस्थांप्राकरदन्तांनिरस्यति।तदभावस्त्विति।अन्योन्याभावस्याधिकरणात्मक
त्वंतदनात्मकत्ववा।क्रमशक्यमित्युपन्यस्यति।स्यादेतदिति।इत्यभेदेनैतदिति।तथाचाधाराधेयभावोनप्रतीयतेतिभावः।भवतूक्तेति।अ
धिकरणात्मकत्वेआधाराधेयभावानुपपत्तिःनित्यत्वानुपपत्तिश्चेति।तथाचभेदभेदस्यानतिरिक्तत्वेआधाराधेयभावानुपपत्तिःअतिरिक्त
त्वेऽनवस्थापत्तिश्चेत्युभयतःपाशारज्जुरिति।समाधत्तेअत्राहुरितिभेदभेदइति।अपिकारान्तद्भेदभेदोप्यधिकइत्यर्थः।प्रामाणिकत्वादिति
प्रमाणसिद्धत्वादित्यर्थः।वक्ष्यतोयावदनुभवसिद्धाभेदस्वावद्भेदोप्यायातीतिभावः।नन्वनुभवागोचरमपीति।नानवस्थेति।युक्तंचैतत्पश्या राम
मःप्रचेति।इयतासर्वबंधेनऽतिरिक्ततयानिरुक्तोऽभावइत्यर्थः।तादात्म्येति।तादात्म्यस्वरूपसंबंधविशेषः।ततसंबंधावच्छिन्नाभावोऽन्योन्या २३

भाववदित्यर्थः॥ तदन्य इति॥ अन्योन्याभावभिन्नोऽभावः संसर्गाभाव इत्यर्थः॥ संसर्गाभावभेदेनाह॥ त्रयं तामावेति॥ नित्य इति॥ उत्पत्तिविनाशरहित इत्य
र्थः॥ विनष्ट इतीति॥ घटे विनष्ट इति प्रतीतिविषयत्वं घटे प्रतियोगिन्यतिव्याप्तिमत उक्तमभाव इति॥ तथा च विनष्ट इति प्रतीतिविषयः संस
र्गाभावो ध्वंस इति फलितं॥ ध्वंसस्योत्पन्नो मानमाह॥ तत्प्रागभाव इति॥ ध्वंसप्रागभाव इत्यर्थः॥ तत्प्रागभावश्च प्रतियोगिप्रागभावश्च उभयत्रेति
तथा च घटदशायां घटप्रागभावदशायां च कपाले घटो भविष्यतीति प्रतीतिवत्वात् घटतत्प्रागभावयोरेव ध्वंसप्रागभावत्वात् द्वितिभावः
विनाश्यभाव इति॥ विनाशी संसर्गाभाव इत्यर्थः॥ स च भविष्यतीति॥ तथा च भविष्यत्यनुभवसाक्षिको विनाशी संसर्गाभाव इति फलि
तं॥ विशेषणप्रयोजनं चोक्तप्रायं॥ तस्य प्रागभावस्य तद्ध्वंसः प्रतियोगिध्वंसः॥ उभयत्रेति॥ प्रतियोगिकाले प्रतियोगिध्वंसकाले चेत्यर्थः॥
प्रसंगाद्यासज्यवृत्तिधर्मावच्छिन्नाभावं प्रमाणयितुं प्रणालीमाह॥ एकमात्रवृत्तीति॥ एकमात्रपर्याप्तवृत्तिकेत्यर्थः॥ अन्यश्चेति॥ अनेकप

सि॰ टी॰ र्य्याप्तवृत्तिकेत्यर्थः। प्रसंगाद्यासज्यवृत्तिधर्म्मावच्छिन्नाभावं प्रसाधयितुं प्रणालीमाह। एकमात्रवृत्तीति। एकमात्रपर्य्याप्तवृत्तिकेत्यर्थः। अन्यश्चेति।
२४ अनेकपर्य्याप्तवृत्तिकेत्यर्थः। ननु व्यासज्यवृत्तिधर्मावच्छिन्नाभावे माना भाव इत्याशंकते नचेति। अंत्ये अनेकपर्य्याप्तधर्म्मावच्छिन्नाभावे
शंकामनुभवेन निरस्यति। घटद्वतीति। तथा चानुभवबलादेवानेकपर्य्याप्तधर्म्मावच्छिन्नाभावः सिद्ध्यतीति भावः। तयोः प्रतियोग्यभाव
योः प्रतियोगितावच्छेदकावच्छिन्नत्वेनैवेति। तथा च द्वित्वावच्छिन्नत्वेनैव समं तद्धर्म्मावच्छिन्नाभावस्याविरोधः। न चोभयाद्यवच्छिन्नाभावव
तिउभयत्वाद्यवच्छिन्नमिति भावः। इदमेव विघटयति नचेक इति। अत एव प्रतियोगितावच्छेदकावच्छिन्नत्वेनैव अभावस्याविरोधादेव तथा
च विशिष्टाभावोऽप्यतिरिक्तः सिद्ध्यतीति भावः। प्रसंगाद्भावग्राहकमानांतरं मीमांसकोक्तं निरसितुमुपक्रमते भद्दास्त्विति। उक्तेति। सं राम
योगसंयुक्तसमवायादीनां पंचानामित्यर्थः। किंत्वनुपलब्धीति। तथा च तादृशप्रमाजन्ये ज्ञाने न सन्निकर्षापेक्षेति भावः। प्रमाणां २४

हेरिति तथा च प्रमाणांतरकल्पना धर्मिकल्पनेति। धर्मिकल्पनातः स्वधर्मकल्पनायः एव लघुत्वादिति भावः अन्यथा सन्निकर्षांतरकल्पने न्व
ष्टानां पंचानां छांकतेन तत्रेति तथा च जन्यसाक्षात्कारत्वावच्छिन्नं प्रति सन्निकर्षत्वेन कारणत्वमिति भावः। सन्निकर्षत्वं च संयोगाद्यन्यतमत्व
मिति ध्येयं अथ रूप एवेति। तथा चात्रापि सन्निकर्षांतरमनायत्या कल्प्यकल्प्यमिति भावः। ननु सन्निकर्षस्यैकस्याभावो न। संयोगाद्यन्य
तमस्य समवायादिघटस्यैकमादाय विनिगमनाविरहेण निर्वक्तुमशक्यत्वेन तेन रूपेण कारणत्वात्। साक्षात्कारेमात्र तु भवत्वेना
त सिद्धसाक्षात्कारत्वाजातेरानुपलब्ध्यज्ञानत्वव्यापकस्यापि सुवचत्वादत आह। किं चेति। नन्वेवमिति। एवं इंद्रियसंबंधविशेषणता
या अतिरिक्तायाः प्रत्यासत्तेः स्वीकारे। योग्यानुपलब्धेपीति। भवन्मते अतिरिक्तप्रमाणत्वेनांगीकृतायाः योग्यानुपलब्धेश्च करणादिना अभा
वग्रहे सहकारित्वादित्यर्थः। तथा च घटोपलब्धेः सत्त्वेन योग्यानुपलब्धेरभावात् तेनाभावप्रत्यय इति भावः। योग्यानुपलब्धिं विविच्य [illegible]

सि·दी· तित्र्यथेति॥ ननु जलपरमाणौ चक्षुःसंयुक्तविशेषणतायां मानाभावादेव न पृथिवीत्वाभावग्रहः यद्यपि तत्र महत्त्वाभावघटितचक्षुरादिदोषात्तता दृश
२५ सन्निकर्षोऽप्यस्तीति विभाव्य सिद्धान्तदा च चक्षुःसंयुक्तविशेषणतायामपि त्रित्वेन महत्त्वाभावग्राहकसन्निकर्षसत्त्वेऽपि पृथिवीत्वाभावग्राहकसन्नि
कर्षस्तत्र नास्तीति फलबलात्कल्प्यते तथा च तत्र न पृथिवीत्वाभावग्रह इत्यत आह स्तंभेति। योग्यदृश्यमानेन तथा च स्तंभेऽपि शाखाभेदग्रहः
संभवति न परमाणौ पृथिवीत्वाभावग्रह इति भावः। एकदेशिमतं दूषयति मूर्त्तस्येति। वायोरिति। इदमुपलक्षणं परमाणौ महद्भेदग्र
हानापत्तेरपि द्रष्टव्यं। योग्यानुपलब्धिं सिद्धान्तयति अत्रोच्यत इति। योग्येत्यस्य विवरणं सहकारिसंबंधेति तथा चाभावप्रत्यक्षसामग्री
विशिष्टा भवति योगिनोऽनुपलब्धिरेव योग्यानुपलब्धिरित्यर्थः। योग्यसन्निकर्षेति तथा च योग्यसन्निकर्षस्यैवाभावप्रत्यक्षसामग्रीघटकत्वात् राम
योग्यत्वं च भानैवेति ध्येयं। उद्भूतरूपत्वाभावेत्विति उद्भूतरूपत्वघटितं सन्निकर्षयोग्यत्वमित्यर्थः। तथा च महत्त्वस्य प्रकृते न योग्यताघटकत्वा २५

तेनउद्भूतरूपाभावग्रहः भवतीति सन्निकर्षयोग्यत्वात् उद्भूतरूपवदिंद्रियग्राह्य इति शेषः। संक्षेप इति। वक्ष्यमाणोऽभावग्राहकसन्निकर्षयो
ग्यत्वं शुक्लरीत्या चक्षुःसंयोगादिर्वैजात्यघटितं मातो जलपरमाणौ पृथिवीत्वाभावग्रहः अपि तु स्थूलेजलेपि शाद्यात्पत्ताभावेऽयोग्यत्वं
गुरुत्वादिवत्तद्व्यक्तित्वेन तादात्म्येन लौकिकविषयतासंबंधावच्छिन्नसाक्षात्कारप्रतिबंधकत्वमितित्तत्वमिति युक्तमुत्पश्यामः। अति किं
इदंपदार्थरूपं चक्षुरादिकिमित्यर्थः। उत्तरयति। तेजसमिति। आलोकवारणायेंद्रियमिति। चक्षुषस्तैजसत्वं सविवादं अतो लक्षणां
तरमाह। रूपग्राहक इति। मनस्यतिप्रसंगवारणाय महदिति। आलोकातिप्रसंगवारणाय महदिति। आत्मन्यतिप्रसंगवारणा
येंद्रियमिति। रसने आप्यत्वं सविवादमत आह रसग्राहकमिति। एतस्य व्या। घ्राणवत्ज्ञेया। एवं पार्थिवेंद्रियादिष्वपि यथायोगं व्या
ख्येयं। मनोवैभववादिनो मीमांसकाः पूर्वपक्षयेति। अत्र मीमांसका इति। मनः पक्षः विभुत्वं साध्यं विस्पर्शद्रव्यत्वं हेतुः अत्र निस्पर्श

सि·टी· त्वं गुणादौ व्यभिचारीति द्रव्यत्वं हेतावुक्तं। द्रव्यत्वमात्रं घटादौ व्यभिचारीति निःस्पर्शत्वमुक्तं। तथा च स्पर्शाभावविशिष्टद्रव्यत्वं हेतुरिति भावः। न
२६ नु दीधितिकृन्मते अदृष्टविशेषाकृष्टत्रुटेर्मनस्त्वेन पक्षतावच्छेदकस्य मनस्त्वैकस्याभावात् कथं पक्षतावच्छेदकावच्छेदेन साध्यानुमितिः
त्रुटौ विभुत्वस्य बाधात्। कथं वा तत्र विभुत्वानुमितिरित्यत आह मनस्त्वं चेति। तथा चानेकपृथिवीवाय्वादित्रुटीनां विनिगमनाविरहेणा
नेकत्वेन गौरवादिति लाघवादतिरिक्तमनःसिद्धिरिति भावः। आत्मन्यतिव्याप्तिवारणायात्मन्योत्वेति। विभुत्वे इति। तथा च भावका
र्यस्यासमवायिकारणैकत्वनियमेन मनोवैभववादिनां आत्ममनयोगरूपासमवायिकारणासंभवेन ज्ञानाद्यनुत्पत्तिरिति भावः। इद
मापाततः। भावकार्यस्य सासमवायिकारणत्वनियमस्य एकत्वादौ व्यभिचारात्यवधेयं। मानाभावादिति। ननु लाघवमेवात्र मानं अत्र राम
नुमनःकल्पने गौरवमत आह संयोगत्वावच्छेदेनेति। ननु लाघवे विभुमनःसिद्धावपि अजसंयोगसिद्धौ वरं जन्यसंयोगत्वमेव द्रव्यजन्यतावच्छे २६

दकमक्ता।अतआहप्रयोजनंचेति।इदमनुमानंमनोवैभवानुमानंसंक्षेपइति।तदर्थक्रममनोवैभवेहिपंचेंद्रियज्ञानयौगपद्यापत्तिः।अतएव
विभुमनस्त्वित्याशंक्यसूत्रकृतोक्तं।प्रयत्नज्ञानायौगपद्यादेकंमनः।एकैकस्मिन्शरीरेएकमेवमनः।प्रयत्नायौगपद्यात्ज्ञानायौगपद्या
च्चेत्याचार्य्याः।किंचमनोवैभवेव्यासंगानुपपत्तेः।अपिचमनसोविभुत्वेगतंनचद्रव्यविभागेनआकाशेश्वरकालादिभिस्तत्कार्य्यसंभवा
दित्यलमनेनेति॥ ॥इतिसिद्धांतमंजरीप्रत्यक्षपरिच्छेदविवृतिः।प्रत्यक्षनिरूपणानंतरंएकप्रयोजनताख्यांसंगतिंप्रदर्शय
न्शिष्यावधानायानुमाननिरूपणंप्रतिजानीतेअथेत्यादिना।अवधानंविषयांतरात्मनोविच्छित्तिः।प्रतिज्ञाचउच्चैःशब्देनप्र
तिपादनं।तथाचोच्चैःशब्देनप्रतिपादनात्भवतिशिष्याणांविषयांतरात्मनोविच्छेदरूपावधानंतेनचनारणपरुदितंशास्त्रंभवती
तिभावः।अथप्रत्यक्षनिरूपणानंतरक्षणनिष्ठः।निरूपणोत्तरक्षणास्वरूपप्रामाण्यापादकदिज्ञानानुकूलव्यापारानंतरक्षणनिष्ठाना

सि.टी.
२७

दात्मफलक्षणास्वरूपप्रामाण्यादिप्रकारकज्ञानानुकूलो व्यापारस्तद्विषयोऽनुमानं इति समुदायार्थः॥ अनुमानं प्रमानुमानं तेन प्रमाणत
त्वमत्र विवक्ष्यते इत्यनेन विशेषः॥ व्यापारश्चावयवघटितशब्दादिः स च निर्विषय एव तथापि व्यापारानुबंधिना विषयता बोध्या॥ अथ शाब्दस्य
लुप्तद्वितीयविभक्तिकस्य योऽर्थप्रत्ययविशेष्यकलक्षणास्वरूपप्रामाण्यप्रकारकज्ञानानुकूलव्यापारानंतरक्षणनिष्ठरूपः सह भे
दसंबंधेन निरूपणारूपक्रियार्थेन विशेषणतयाऽन्वेति स्तोकं पचतीतिवत्तत्तथैव साकांक्षित्वादिति ज्ञेयं॥ केचित्तु पदस्य नानंतरक्षणा
निष्ठधर्मिणि शक्तिः। किंत्वनंतरक्षणावृत्तित्वधर्म एव शक्तिः। तस्य चाश्रयाश्रयिभावसंबंधेन निरूपणास्वरूपक्रियार्थेनान्वयः। क्रियावि
शेषणस्थले एवाभेदान्वयनियमः। एवं नामार्थधात्वर्थयोरभेदान्वये विभक्त्यपेक्षापि अव्ययातिरिक्तस्थले एवेत्याहुः। नव्यास्तु अथश राम
ब्दस्यानंतरक्षण एव शक्तिः। अनंतरत्वं चाधिकरणतया ध्वंसविशिष्टत्वं तथा चाथपदोत्तरं तु तत्समभिव्याहृतार्थनिष्ठता तस्यामेवाथशब्दार्थस्यध्वं २७

सविशिष्टलक्षणांशस्यान्वयः॥ न तु धात्वर्थे इत्याकूतम्॥ अत्र च सिद्धसाध्यसमभिव्याहारलभ्यस्य हेतुहेतुमद्भावस्य यदि तु निरूपणीययोः संगतित्वं निरू
प्ययोः पौर्वापर्यं नियामिका इति विभाव्यते। तथा प्रतिबंधकजिज्ञासामानिवृत्तौ अवश्यवक्तव्यमित्यस्यावसरस्य संगतित्वं अथोत्पन्ने नष्ट
वा तेन वक्तृतोऽथशब्दो मंगलात्मकं इति तत्त्वं ग्रंथादौ मध्ये मंगलमाचरंति। तत्र लक्षणस्वरूपप्रामाण्यादिभिरनुमाने निरूपणीये।
अत्रानुमानमिति लक्ष्यनिर्देशः॥ अनुमितिकरणत्वं लक्षणं। अन्यथा उद्देश्यतावच्छेदकविधेयतावच्छेदकयोरैक्ये न घटो घट इतिव
त्लक्षणवाक्यं निराकांक्षं स्यात्॥ ननु मितिकरणमित्यस्य व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यज्ञानकारणमित्यर्थो वाच्यः। तथा
च लाघवात् व्याप्तिज्ञानत्वमेवानुमानलक्षणमस्तु इत्यत आह अनुमिनोमीति। तथा चोक्तरूपेणानुमितेरप्रवेश॥ किं त्वनुमिति
त्वेनेति। न लाघवगौरवावभाव इति भावः। ननु अनुमितित्वं मानसत्वव्याप्यजातिर्वक्तृ किंवा वह्निमनुमिनोमीति प्रतीत्या वह्नि नि

सि·दी·
२८

ष्टाविलक्षणविषयतासिद्ध्यभावस्यकार्य्यतावच्छेदिकाभासतेनतत्त्वनुमितित्वंअनुमिनोमीतिधीःसामान्यतोनास्तीति।तथाचतत्तत्करणस्या
पिप्रत्यक्षप्रमाणत्वात्।नचचतुर्द्धाप्रमाणविभाजनमसंगतमतआह।जन्यज्ञानजन्येति।तथाचानुमितित्वंनजातिःनचाविलक्षणविषय
ता।किंतूक्तोपाधिस्वरूपंमानसाद्यवृत्तिकार्य्यतानवच्छेदकं।अतएवकार्य्यकारणभावकल्पनागौरवमपिनास्तीतिभावः।अत्राव्यभि
चारित्वांतंव्यभिचारित्वात्त्वंचद्वयमेवजातिविशेषणं।प्रत्यक्षातिप्रसंगवारणंअव्यभिचारित्वांतेनजातिविशेषणेनइदमेवविषयति
षत्यक्षवारणायेति।तद्भिजन्यत्वंजन्यधीजन्यत्वंतत्रापिजन्यज्ञानजन्यत्वाव्यभिचारित्वेऽपि।तद्विचारक्षणत्वंहितदाश्रयाणां।तद्भिउपमिति
त्वशाब्दत्वादिजातिस्वरूपंहिनयथा।जन्येति।नजन्यशाब्दज्ञानजन्यत्वाव्यभिचारीत्यर्थः।सम्यगिति।किंजन्यत्वेनशाब्दज्ञानविशेषणेनेति राम
शेषः।नचमोक्षजनकतावच्छेदकमिति।तथाचतांजातिमादायतत्त्वसाक्षात्कारेऽतिव्याप्तिरितिभावः।अतिव्याप्तिंनिरस्यतितस्येति।। २८

दृशजातिविशेषैरित्यर्थः। शाब्दविशेषविषयकेति। श्रोतव्यो मंत्रश्चेत्यादिस्मृतिजन्यशाब्दबोधजन्येत्यर्थः। जन्यशब्दज्ञानजन्यत्वाव्यभिचारित्वात्।
जन्यशब्दज्ञानप्रयोज्यत्वाव्यभिचारित्वात्। तथा च तादृशजातिर्जन्यशब्दज्ञानप्रयोज्यत्वव्यभिचारीति न तज्जातिमादायोक्तव्याप्तिरिति भा
वः। इत्थं चानुमितिलक्षणे जन्यशब्दधीप्रयोज्यत्वव्यभिचारीत्यर्थोऽन्ये यः। न तु तत्त्वसाक्षात्कारस्य शाब्दज्ञानप्रयोज्यत्वे मानाभावेन तत्राति
व्याप्तिरस्तु इत्यादित्यत आह। जातिपदं चेति। अत एव जातेर्मानसाहृत्तिविलक्षणत्वादेवा स्मृतिवारणायेति स्मरणमात्रानुभवसाक्षिको जा
तिविशेष एव स्मृतित्वम्। अनुभवसामग्रीप्रतिबध्यतावच्छेदकतया वा सिद्धस्मृतित्वं जातिरित्यभिप्रायः। व्याप्तिज्ञानं पक्षज्ञानं व्याप्तिवि
शिष्टपक्षादिज्ञानं मतभेदेनानुमितिकरणमिति निर्णिविकीर्षुः स्वमतेनानुमितिकरणं चाभिधातुं पृच्छति। नन्विति। उत्तरयति व्याप्ती
ति। नन्विति तथा च लाघवात् लघुपदार्थसाध्यस्य हेतोर्व्याप्तिज्ञानमेवानुमितिकरणं न तु व्याप्तिज्ञानं अभावादिज्ञानं वा गौरवादिति भावः।

सि·टी· प्रसंगात्व्याप्तिं निरूपयितुमाह। नन्विति। पर्वतीयवह्न्यत्यंताभाववतीति। साध्यतावच्छेदकावच्छिन्नसाध्यात्यंताभावे विवक्षिते। एतद्दोषपरीहा
२९ रेपि केवलान्वयिन्यतिव्याप्तिर्दुरुद्धारैवेति न तथा विवक्षितमिति भावः। केवलान्वयिसाध्यकानुमानमेवेति। तथा च तत्रानुमानमलीकोव
क्ते तो साध्यस्य केवलान्वयित्वज्ञानदशायामनुमित्यपलाप इत्यर्थः। तथा च तेषां लाघवात् साध्यवदन्यावृत्तित्वज्ञानस्यानुमितिकारणत्वे
ल्कः तैः केवलान्वयित्वज्ञानदशायामनुमितिर्न जायत इति। तथा च व्यतिरेकित्वज्ञानकालीनतादृशानुमितेः सत्वेलक्षणं व्याप्तेस्तत्राव्या
प्तमेवेति तत्त्वं इहेति। केवलान्वयित्वज्ञानदशायामपीति शेषः। तथा चानुमितिः सुप्रसिद्धैवेति भावः। सिद्ध्यसिद्धिभ्यां व्याघातादाह। किंचेति।
नह्यलीकमज्ञेयमिति। तथा चालीकेपि ज्ञेयत्वस्य साध्यस्य सत्त्वेन साध्याभावाप्रसिद्ध्याव्याप्तिरिति भावः। आहुरित्यत्रास्वरसमाह। तत्रेति। राम
लक्षणवाक्य इत्यर्थः। वदंति दूषणमिति शेषः। कार्त्स्न्यं कुत्रान्वेतीति पृच्छति। कोयमिति। कृत्स्नेन साध्येनेति। तथा च कार्त्स्न्यं साध्येसाधनेन साधन २९

वृत्तिर्वा विशेषणमित्यर्थः। कात्स्न्यं साध्यवन्निष्ठेति तन्नेत्याह किंत्विति। अत्र कल्पे दोषस्य साधनवन्निकान्त्य विशेषणदोषस्यैव स्पष्टप्रसिद्धत्वादुपेक्षितं।
सुप्रसिद्धानुमाने वह्निमान् धूमादित्यादौ। इदन्तूपलक्षणं एकव्यक्तिकसाध्यकाव्याप्तिस्तु बोध्या। एकव्यक्तिकहेताविति। जातिमान् सत्त्वादि
त्यादौ एकमात्रवृत्तीति। एतद्धूमवान् एतद्धूमात् इत्यादौ व्याप्तिस्वरूपं सिद्धान्तयति। अत्रोच्यत इति। साध्यसामानाधिकरण्येति। साधनता
वच्छेदकसंबंधेन साधनाधिकरणे विशेषणतासंबंधेन वृत्तित्वव्यापकतावच्छेदकसंबंधेन साध्याधिकरणे विशेषणतावच्छेदकसंबंधे
न वृत्तित्वमित्यर्थः। तेन कालिकेन धूमाधिकरणे वृत्तिजलत्वादेर्वह्निसामानाधिकरण्येऽपि वह्निसामानाधिकरण्यायोगोलकत्वादेः का
लिकेन धूमाधिकरणे सत्त्वेऽपि नाव्याप्तिरतिव्याप्तिर्वेति। न च येन येन संबंधेन साध्यं न सामानाधिकरण्यं तेनैव साध्यसामान्याधिकरण
विवक्षणे संबंधानुगमो दोषः। इदमेव विशदयति। यत्समानाधिकरणा इति। अर्थक्रमपाठक्रम एवं जडे महत्त्वोलक्षणलाघवति भवती।

 हीति।धूमसमानाधिकरणाभावं तइति धूमवत्त्वप्रकारकप्रमाविशेष्यत्वादइत्यर्थः॥ अलक्ष्यलक्षणं निवारयति।नहीति।वह्निसमानाधिकरणेति
 विशेषणतयेत्यर्थः।उक्तव्याप्तेर्हेतुवृत्तित्वात्लक्षणान्तरमाह।यद्विशिष्टेति।हेतुतावच्छेदकविशिष्टेत्यर्थः।तेन द्रव्यं गुणकर्मान्यत्व विशि
ष्टसत्त्वादौ विशिष्टसत्त्वस्य सत्त्वानतिरेकेण सत्तानतिरेकेण सत्तासमानाधिकरणगुणत्वप्रकारकप्रमाविशेष्यत्वस्य विशेषणता संबंधे
न द्रव्यत्वासमानाधिकरणत्वेपि न क्षतिः।गुणस्य विशिष्टसत्तात्वावच्छिन्नानधिकरणत्वेन गुणत्वप्रकारकप्रमाविशेष्यत्वस्य हेतुतावच्छे
दकावच्छिन्नासमानाधिकरणत्वात्।एवं हेतुतावच्छेदकसंबंधेन तत्पाद्यन्यत्सर्वं पूर्ववद्व्याख्येयं।असद्धेतौ लक्षणं व्यावर्त्तयति।नचेति।ईदृशं
वह्नित्वविशिष्टसामानाधिकरण्यं सार्वं धूमसमानाधिकरणमित्यर्थः।केवलान्वयिनि लक्षणं संगमयति।अस्तिचेति।यावतां विशेषणेति
शेषः।एवमिति।अपास्तमपास्तमित्यग्रेतनेन संबध्यते नेदमनुमानं न केवलान्वयिसाध्यकानुमितिरित्यर्थः।ततोपि साध्यवदन्यावृत्तित्वेम

तिसाध्यसामानाधिकरण्यादपि लघुत्वात् अभावाप्रवेशेनेत्यर्थः। मेयत्वमनुमिनोमीत्यनुभवापलापापत्तेश्चेति प्रागुक्तदूषणं च द्रष्टव्यं। अत ए
व लघुत्वादिति हेत्वसिद्धिं त्यजति। तथा हि अभावाप्रवेशलाघवं चेत्तन्न तत्र प्रकृते पक्षे विशिष्टसामानाधिकरण्ये यावत्तद्रूपत्रयावत्त्वस्य व्याप
कत्वाद्रूपस्य दुर्वचत्वात् व्यापकत्वस्य चाभावघटितत्वादिति तेषां विवक्षितम् उक्तं। यावत्त्वस्यापेक्षाबुद्धिविशेषविषयत्वस्य अभावाघटि
तस्यापि वक्तुं शक्यत्वात् इति ध्येयं। अत्र चार्वाका इति। अत्र अनुमितिकरणत्वेन व्याप्तिनिश्चयत्वस्य प्रमाणत्वे चार्वाकाः पूर्वपक्षयं
तीति शेषः। पर्वपक्षमेवाह भवत्विति इति शंकायाः इत्याकारकव्यभिचारशंकाया इत्यर्थः। भूयोदर्शनात्। भूयः साध्यसाधनयोः सा
मानाधिकरण्यदर्शनात् तन्निवृत्तिः शंकानिवृत्तिः। शतशः इति। पृथिवी लोहलेख्या पृथिवीत्वादित्यादौ घटपटादिष्विव बहुस्थलेषु साध्य
साधनयोः सामानाधिकरण्योपलब्धावपि हीरके व्यभिचारोपलब्धेर्नैतत्र व्याप्तिनिश्चय इत्यर्थः। तर्कस्येति। आपाद्यापादकयोर्व्याप्तिनि

सि·टी· श्चयस्य तर्केऽपि कारणत्वात्तत्रापि व्यभिचारशंकानिवृत्त्यर्थं तर्कान्तरापेक्षायामनवस्थानादित्यर्थः॥ कुतोऽनुमानं कुतो हेतोरनुमानमित्यर्थः॥ तथा च
३१ व्याप्तिग्राहकाभावेन व्याप्तिनिश्चयासंभवादनुमानं [illegible] प्रमाणमिति भावः॥ व्यभिचारज्ञानविरहादिकमिति॥ अत्र ज्ञानं निश्चयः शंका च व्या
दिपदात् सहचारज्ञानपरिग्रहः॥ न च ह्येः शंकेति शंकायाः सर्वत्र संभवित्वेन तदभावस्य क्वाप्यसंभवात् ननु व्यभिचारशंका क्वचित् क्वचिद्
तत्कारणकोटिस्मृत्यादिकमवश्यं भवितव्यमित्यत आह॥ अनुभूयत एवेति॥ तथा च प्रमाणाभावेन व्यभिचारसंशयसामग्रीसंशयो वा
निश्चयो वा न सर्वत्रेति भावः॥ न त्विति॥ दृष्टान्तेति॥ तत्र महानसादौ धूमे व्याप्तिग्रहो न तु पर्वतीयधूमे तैर्धकोऽइत्यर्थः॥ उक्तेति॥ यद्विशिष्टसमा
नाधिकरणयावंतसाध्यसमानाधिकरणेत्यादीत्यर्थः॥ धूमत्वेन गृहीतेति॥ तथा च धूमत्वप्रकारकव्याप्त्यनुभवेन धूमत्वप्रकारेण महानसी राम
येगृहीतव्याप्तेः स्मरणं ततः स्मृतव्याप्तिवैशिष्ट्यावगाहि भ्रमरूपं पक्षधर्मताविषयकं जायते ततोऽनुमितिरित्यर्थः॥ न चानुमितिप्रामाण्ये प्र ३१

योजकोयथाःर्थपरामर्षएवगुणःसंप्रदायसिद्धःसचदृष्टांतवृत्तिव्याप्तिभानेसर्वत्रपरामर्षोयथार्थत्वेनसंभवतीत्यतआहायत्वेति।सकलधूमगोचरमे
वेति।तथाचधूमत्वसामान्यलक्षणाप्रत्यासत्त्यापर्वतीयधूमेपिव्याप्तिग्रहोमहानसधूमेव्याप्तिग्रहदशायामितितत्स्मरणात्।विशिष्टपराम
र्षोयथार्थएवेतिभावः।तदाश्रयसाक्षात्कारजननोत्पन्नेतरेंन्द्रियत्वेनसंभवतीतिशेषः।ननुज्ञानसंस्कारः।तदाविशुद्धितेतियत्सामान्यमिति।
तथाचतत्तद्रूपीयधूमत्वाश्रयसामान्यप्रत्यक्षंप्रतितत्तद्रूपीयचक्षुर्लौकिकसन्निकर्षविशिष्टविशेष्यकतत्तद्रूपीयचाक्षुषप्रकारीभू
तधूमत्वत्वेनकारणतास्वपेक्षणीयंचात्रतदिंद्रियकरणकतद्धर्मबोधकसामग्र्यंतां।तेनगाढांधकारेस्तोदामिनीसंपादनानिनेविद्युत्प्रत्य
क्षेत्वरामेनचाक्षुषोनिखिलद्रव्यसाक्षात्कारसंतानइतिभावइतिनव्याः।यत्रधूमइतितथाचदृष्टांतवृत्तिधूमेव्याप्तिज्ञानात्दृष्टांतेऽनुमि
तिःस्यादित्यर्थः।नचेति।पक्षावृत्तिधूमविशेष्यकव्याप्तिज्ञानेकारणमतोदृष्टांतीयधूमविशेष्यकव्याप्तिज्ञानादनुमितिरित्यर्थः।धूमत्वेनसा

सि·दी·
३२
सामान्यलक्षणेति।तथा च सामान्यलक्षणाजन्यासत्यादृष्टांतीयधूमविशेष्यकं जायमानं पक्षवृत्तिधूमविशेष्यकमपीत्यर्थः॥ न च हेतोरिति। पक्षवृत्ति
त्वसंदिग्धसाध्यवत्वमितिभावः॥ धूमज्ञानस्य सत्वात् धूमस्य पक्षवृत्तिताज्ञानादित्यर्थः॥ व्याप्यत्वप्रकारेणेति। व्याप्तिविशिष्टवैशिष्ट्यावगाहिनि
श्चयोऽस्त्वितिहेतुरित्यर्थः। व्याप्तिज्ञानमात्रमित्यत्र मात्रपदेन पक्षधर्मताज्ञानव्युदासः॥ ननु व्याप्तिज्ञानं पक्षधर्मताज्ञानं च दंडचक्रादिवत्
कारणत्वमस्तु। किं वैशिष्ट्यवैशिष्ट्यावगाहित्वेन कारणत्वेनेत्येकस्तथाकारणत्वविवक्षणफलमाहानचेति। अथैकरूपेण व्याप्तिपक्षधर्म
ताभयावगाहित्वोक्तौ नायमतिप्रसंग इति किं व्याप्तिविशिष्टवैशिष्ट्यावगाहित्वेन हेतुत्वेनेति चेन्न। तथा सति वह्निव्याप्यवानिति निरवच्छि
न्नव्याप्तिप्रकारकपक्षधर्मताविषयकशाब्दादिज्ञानानुमित्यनुत्पादापत्तेः॥ निश्चयपदमिति। तथा च व्याप्तिप्रकारकपक्षधर्मतानिश्चयत्वे राम
न कारणत्वमितिभावः॥ व्याप्तिज्ञानेसहकारिव्याप्यतावच्छेदकप्रकारकव्याप्तिज्ञानेनानुमितौ जननीयेकारणमित्यर्थः॥ प्रागुक्तातिप्रसंगं ३२

मीमांसको वारयति। व्याप्यतावच्छेदकमिति। इति ज्ञानोदयादपि नावह्निव्याप्यधूमवानिति व्याप्तिविशिष्टवैशिष्ट्यावगाहिज्ञानसमुच्चयः। ननु भव
तां कारणतावच्छेदकलाघवेपि कल्पनागौरवमापततीति। तथा हि यत्र ज्ञानद्वयात् मीमांसकस्यानुमितिस्तत्र कारणापलापो विशिष्टवैशिष्ट्या
वगाहिज्ञानतद्ध्वंसादिकल्पनं चाधिकमत आह। किं चेति। धूमत्वेनेति। तथा च व्याप्यतावच्छेदकरूपेण व्याप्तेः पक्षधर्मतायाश्च ज्ञानावगाहनादि
त्यर्थः। तृतीयलिंगपरामर्षत्वेन च सिद्धादेवेत्येवकारेण मीमांसकोक्तज्ञानद्वयव्यवच्छेदः। एवं चात्र विशिष्टवैशिष्ट्यावगाहिज्ञानत्वेन लाघ
वात्। कारणतायां क्लृप्तायां ज्ञानद्वयान्नानुमितिः किं तु कारणाविलंबेन विशिष्टवैशिष्ट्यावगाहिज्ञानमेवोत्पद्यत इति यद्गौरवं तत्फलमुख
तयानदोषमाहुरिति भावः। तृतीयमिति। अनुमितिकारणीभूतो लिंगपरामर्शः तृतीय एवेति कथमित्यर्थः। दृष्टांते धूमदर्शनं प्रथममि
त्यर्थः। व्याप्तिभानमिति। दृष्टांतीयधूमस्य व्याप्तिमन्नयामभावं द्वितीयमित्यर्थः। तद्विशिष्टेति। दृष्टांते प्रागनुभूतेदानीं स्मृतव्याप्तिविशिष्टस्य हे

तिःपक्षवृत्तित्वावगाहिज्ञानंतृतीयमित्यर्थःप्रामाणिकंगौरवंनदोषायेत्यतआहव्यभिचाराद्वेति।सिषाधयिषाधीनमहानसादावनुमितिसंभ

वद्वितीयज्ञानस्यापितत्रानुमितिकरणस्यसंभवादितिभावः।सोयंपरामर्षःव्याप्तिविशिष्टवैशिष्ट्यावगाहिउक्ततृतीयज्ञानात्मकइत्यर्थः।व्या
पाराभावादिति।यद्यपिसिद्धस्थलेनपरामर्शेसिद्धिनाशोव्यापारःसंभवतितथापिपरामर्षमात्रेतथात्वसंभवतात्पर्य्यंतथाचव्यापारवत्कार
णत्वमेवकरणत्वमितिभावः।परामर्षव्यापारकंत्वनुमितिकरणमितिविशेषः।भूतभाविन्यामिति।यद्यपिस्वस्वव्यापारान्यतरस्यानन्यथासि
द्धनियतपूर्ववर्त्तित्वमेवकारणत्वंतत्वपरामृश्यमानभाविनष्टेवाल्लिंगेपिसंभवति।तृतीयलिंगपरामर्षस्यव्यापारस्यतत्रसत्वात्।तृतीयलिं
गपरामर्षलिंगज्ञानत्वादिनाकारणत्वेनावच्छेदकीभूतानांतादिहेतोरपिकारणत्वात्।प्रविषयकव्यापारेकारणत्वस्यकारणकारणतावच्छे
दकसाधारणस्यापिवन्हुंशकपालादिस्फुटीभविष्यति।तथापिव्यापारत्वावच्छिन्ननियतपूर्ववर्त्तित्वस्यैवात्रप्रमाणत्वेनविवक्षितत्वात्।अतीता

नागतादिज्ञायमानलिंगे च तदसंभवात्। अत एव व्यापारवत्कारणं करणं इति करणसामान्यलक्षणं व्यापारत्वावच्छिन्ननियतपूर्ववर्त्तित्वा
र्थकमिति प्राचीनाः। वस्तुतो परामृश्यमानलिंगत्वेनैव करणता। अत एव तद्वादनुमानं त्रिविधमित्युक्तौ केवलान्वयिसाध्यकादिनात्रैवि
ध्यं हेतुधर्मत्वेन वस्तुतः। न च विनिगमनाविरहः परामृश्यमानलिंगापेक्षया लिंगपरामर्शत्वेन कारणत्वस्य एकलिंगविषयकना
नापरामर्शस्य कारणताकल्पने गौरवपराहतत्वात्। विनिगमनाविरहेनापि परामृष्य परामृश्यमानलिंगत्वेन करणतासिद्धेरपस्तु
हत्वाद्यानवात्। नाहि लिंगे पूर्ववर्त्तित्वघटितकारणतावाधात्तद्विशेषकरणत्ववाधइति वाच्यं। स्वस्वव्यापारान्यतरपूर्ववर्त्तित्वम
वकारणत्वं ते ते विशिष्टश्रमिजनकदंडस्यापि कारणत्वं। तस्यातीतादिलिंगेपि सत्वात्। न च लिंगस्य कारणत्वे अतीतादौ कारणता
याः सर्वलिंगे च करणतायानिर्व्वाहकत्वं तृतीयलिंगपरामर्श एव व्यापारो वाच्य सत्वे न संभवति। तृतीयलिंगपरामर्शविनष्टस्याविद्यमान

सि·टी· स्यवालिंगस्याकारणत्वात् इति वा। यो ऽन्ततीयलिंगपरामर्षे लिंगज्ञानत्वेन हेतुता यां लिंगस्यापि विनष्टकारणता याहकमानेन हेतुत्वं सिद्ध
३४ न्ति। स्वविषयकव्यापारेकारणतावच्छेदकावलीढपूर्ववर्त्तित्वेन हेतुत्वे विशिष्टकारणताग्राहकेन मानेन मानेन नातीतलिंगस्यापि विशि
ष्टपरामर्शव्यापारः सिद्ध्यति। एवं चानुव्यवसायजनितसंस्कारो व्यवस्यापि व्यापारेण कार्य्यकारणभावांतरकल्पनमपीति लाघव
मिति त्वं किं त्विति चेत्। व्याप्तिज्ञानस्य करणत्वे करणतावच्छेदकगौरवादाह। साध्येति। न तु साध्यत्वमपि लिंगनिष्ठव्याप्तिनिरूपकत्वादिष्ट
पं गुरुभूतमेवेत्यत आह। लिंगज्ञानं चेति। इतोपि लाघवादाह। जन्यज्ञानमात्रे इति। अत्र करणफलयोः सामानाधिकरण्येन कार्य्यकार
णभावात् ईश्वरेणानुमितिरसत्वात्। ज्ञानजन्यत्वं विशेषितमिति ध्येयं। अतिप्रसंगः घटज्ञानात् स्यादनुमितिप्रसंगः व्यापाराभावेन परामर्श राम
रूपव्यापाराभावेन। तन्निरासात्। अतिप्रसंगनिरासात्। न तु जन्यज्ञानत्वेन परामर्शव्यापारत्वस्यानुमितिकरणतायां स्मरणात्मकपरा ३४

मर्शान्नानुमितिःस्यात्तन्नस्मरणात्मकपरामर्शव्यापारकस्यैवसंस्कारस्यैवसत्वात्तत्तुज्ञानस्येत्यतोज्ञानपदंचेति।तथाचजन्यसविषयत्वेन
संस्कारेच्छाज्ञानादिसाधारण्येनपरामर्शव्यापारज्ञानांसंस्कारादीनांकरणत्वमितिभावः।जन्यज्ञानत्वेनैवकरणत्वंस्मरणात्मकपराम
र्शस्थलेतुस्वजन्यसंस्कारजन्यस्मरणात्मकपरामर्शएवानुभवस्यव्यापारइतितत्रापिज्ञानजन्यत्वेनज्ञानकरणत्वंसुवचमित्याहपू
र्वानुभवएवेति।पूर्वानुभवस्येत्यर्थः।क्वचित्त्वाकारद्वयस्यपाठःक्वपाठःक्वापामादिकः।तद्धेतिअनुमानमनुमितिकरणमित्यर्थः।त्रैवि
ध्यमाह।केवलान्वयीति।तत्रेतित्रिविधेषुनिरूपणीयेष्वित्यर्थः।केवलान्वयीतिभावः।यद्वानुमितिःभावेल्युट्तथाचकेवलान्वयि
साध्यकानुमितिःकेवलान्वयीत्यर्थः।केवलान्वयित्वंपारिभाषिकंविज्ञायतद्घटकसाध्यकेवलान्वयित्वजिज्ञासुमुन्नयति।तत्रेति।के
वलान्वयित्वनिरुक्तनिविष्टसाध्यत्वेत्यर्थः।तथाचतन्निरुक्तौसाध्येवास्तविकंइदंकेवलान्वयित्वंनिष्टमितिभावः।सर्वत्रेति।प्रतियोगिम

सि·दी· मानाधिकरणंयद्यत्तद्भिन्नत्वंतदभावप्रतियोगित्वमर्थः॥अभावेहितन्निष्ठत्वविशेषणात्तनाकाशाभावेऽव्याप्तिः।प्रतियोगिवैयधिकरण्यविशेष
३५ णाद्वा।संयोगात्यंताभावेऽव्याप्तिरितिभावः।पदार्थान्योन्याभावप्रतियोगितानवच्छेदकत्वमेवकेवलान्वयित्वमित्यर्थः॥तदुक्तमाहपथेति॥अ
भिधेयत्वादिकंकिंतदाह।भगवद्भिरिच्छेति।अस्मात्तच्छब्दादयमर्थोबोद्धव्यइत्याकारिकेश्वरेच्छाशक्तिःप्रवृत्तिविषयत्वमित्यर्थः।वस्त्विति।यत्नत
पदशक्यत्वाच्चेत्यपिद्रष्टव्यं।भगवज्ज्ञानविषयत्वादिति।प्रमेयत्वादिसामान्यलक्षणाजन्यप्रमेयंसर्वंइत्याद्यस्मदादिज्ञानविषयत्व
स्यापिसत्वाच्चेत्यपिबोध्यं।अत्रकेवलान्वयिसाध्यकानुमितिरेवनसंभवति।अनुमितिसामग्र्यभावादित्याशंकते।अत्रकेचिदिति।साचपक्ष
तेत्यर्थः।इतिकेवलान्वयिसाध्यकमित्यर्थः॥सिषाधयिषेतिसाधयितुमिच्छा।सिषाधयिषातद्विरहवैशिष्ट्यंचसाध्यवत्वनिश्चयविशेषणं। राम
अत्रवैशिष्ट्यमेककालावच्छेदेनैकात्मवृत्तित्वंतेनभिन्नकालीनविभिन्नाधिकरणकसिषाधयिषाकालीनसिद्धौनपक्षतेतिभावः।प्रकृते ३५

केवलान्वयिनि पक्षमात्रमुपपादयति। सचेति। नन्विति। संशयः कृतेति शेषः। विशिष्टान्तं सिषाधयिषाविरहविशिष्टान्तमित्यर्थः। संक्षेप इति।
एवंविशिष्टसत्त्वं विनाशि षाधयिषाविरहाभावः पक्षतेत्युक्तौ सिषाधयिषाशून्यसिद्ध्यभावस्थले पक्षता न स्यादिति। तत्र विशिष्टाभाव
संपत्तये विशेष्यभाग इत्यर्थः। केवलव्यतिरेकित्वमाह। असत्पक्ष इति। निश्चितसाध्यत्वं सपक्षत्वं तत्तच्छून्यहेतुश्च केवलव्यतिरेकी
त्यर्थः। हेतौ असत्पक्षमेवाह। तत्त्वं चेति। असत्पक्षत्वं चेत्यर्थः। साधनसहचारेति संपातायातं पक्षातिरिक्ते अनिश्चितसाध्यकत्वमेवला
घवेन सम्यक्त्वात्। साध्यसाधनसहचर्य्यमस्तीति इदं च ज्ञानागर्भितमेव व्यतिरेकित्वमित्यभिप्रेत्य निश्चयगर्भितं तदित्यभिप्राये
णाह। निश्चीयते चेति। न चेति। अनिश्चितसाध्यकत्वमेवेत्येवकारेण पक्षातिरिक्ते त्यादिव्युदासे न क्वचित् साध्यसाधनसाहचर्य्यमेवे
पाठः। स च साधनांशे वैयर्थ्याद्धेयः। घटादाविति। तथा च पृथिवीत्वेन पक्षतायां घटादेरपि पक्षतान्तर्गतत्वात्। तत्र साध्यनिश्चयेऽपि प

शि॰टी॰ रूपातिरिक्तेसाध्यादिनिश्चयासत्वात्तद्व्यतिरेकित्वहानिरितिपक्षातिरिक्तेत्यवश्यंव्यतिरेकिलक्षणेनिवेश्यमितिभावः॥अन्यथाघटादे
३६ साध्यानिश्चयेनिरूपनानापत्तेरित्यर्थः॥उक्तपक्षतेति॥सिद्ध्यभावस्यपक्षतात्वात्तस्यचासत्वादित्यर्थः॥पृथिवीत्वावच्छेदेनेति॥अ
वच्छेदकावच्छेदेनानुमितिंप्रतिअवच्छेदकावच्छेदेनानुमितिंप्रतिअवच्छेदकावच्छेदेनानुमितिंप्रतिअवच्छेदकावच्छेदेनादृशसि
द्ध्यभावएवपक्षतेत्यर्थः॥तथाचघटादेपृथिवीत्वसामानाधिकरण्येनविधर्मानापिसिद्धिर्नपक्षतावच्छेदकावच्छेदेनानुमिति
कारणपक्षताविरोधिनीतिभावः॥मो॥इतिपक्षतावच्छेदकावच्छेदेनसाध्यनिश्चयोस्तिइदंतुसमाधिसौकर्यायइत्युक्तंवस्तुतोघटादेइतराभि
न्नइतिघटत्वेनघटेइतरभेदज्ञानेपिपृथिवीतरभिन्नाइतिपृथिवीत्वेनघटेइतरभेदानुमितौबाधकाभावात्॥समानधर्मितावच्छेद राम
ककसमानविषयकसिद्धेरेवपक्षताविघटकत्वात्॥अतएवपर्वतोवह्निमानइतिसिद्धावपिस्यावयोवह्निमानित्यनुमितिःसर्वानुभ ३६

विकोषप्रसंगात्व्यतिरेक्यनुमितौ कारणीभूतज्ञानविषयव्याप्तिमाह। अत्रेति। अत्रव्यतिरेक्यनुमितौ उक्तसाधनसामानाधिकरण्याय यावत्
समानाधिकरणपदरूपा। यंच इत्यनेनास्वरसस्सूचितः सच सामानाधिकरण्यपदज्ञानंविशेषणाज्ञानविषयत्व्यभिचाराज्ज्ञानाभावस्य
प्रतिबंधकाभावविषयाकारणेंत्याप्तिज्ञानेनच साध्याभाववद्धेत्वभाववयोः सामानाधिकरण्यंनिरुक्तव्याप्तेज्ञायमानेप्रकारतयाभा
षते। अपितुसाध्यसाधनयोरेवेति। कथमभाववयोः सामानाधिकरण्यपदज्ञानानादेशाद्व्याप्तिग्रह इतिअत एवदीधितिकृतापिव्यतिरे
कसहचारेणान्वयव्याप्तिग्रहणप्रयाणत्वेति। वाकारेंस्वमस्वरससूचनायेवदत्तइतिध्येयं। नचेतिअभाववयोर्व्याप्तिग्रहः। कथंभा
वानुमापकइत्यर्थः। अतिप्रसंगादिति। घटव्याप्तिग्रहात्पटानुमितिःस्यादित्यर्थः। साध्येति। तथा च ईदृशव्यतिरेकव्याप्तिविशिष्ट
नयहितोः पक्षधर्मतावगमात् अनुमितिसंभावात् इत्यर्थः। साध्यानुमापकः व्यतिरेकिनीतिशेषः। अन्येनव्या। उभयान्यइतिके

वलान्वयिकेवलव्यतिरेक्यन्य इत्यर्थः। वक्ष्यतेन्वयव्यतिरेकसहचाराधीनग्रहीतव्याप्तिकत्वमेवान्वयव्यतिरेकित्वं लाघवादिति तत्त्वं। यथा
प्रसिद्धेति। वह्निमान् धूमादित्यर्थः। एवमिति। केवलान्वयिकेवलव्यतिरेक्यन्वयव्यतिरेकिहेतावभिहितेत्यर्थः। तदाभासाः हेत्वाभासा
इत्यर्थः। तत्त्वनिर्णयविजयप्रयोजकत्वादिति शेषः। हेत्वाभासत्वं च साध्यव्याप्यवत्त्वेन साध्यवानित्याकारकमितिकारणीभूताभा
वप्रतियोगियथार्थज्ञानविषयत्वं व्यभिचाराद्यन्यतमत्वं वा इत्यर्थः। तत्रेति हेत्वाभासेन निरूपणीयेषु बाधिता इति पंचस्वेवेति शेषः।
सव्यभिचारश्चेति। सव्यभिचारत्वं च साध्यसंदेहजनककोटिद्वयोपस्थापकतावच्छेदकरूपवत्त्वं। तच्च साधारणत्वादीति मंतव्यं। सव्य
भिचारस्त्रैविध्यमाह। साधारणेति। तत्रेति त्रिविधव्यभिचारे साध्यवदन्येति। धूमवान् वह्नेरित्यादौ साधारणे साध्यवदन्ये अयोगोलके व
ह्निसत्त्वादित्यर्थः। नन्विदं लक्षणं भूर्नित्या गंधवत्त्वादित्यसाधारणे संयोगसाध्यकद्रव्यत्वे चातिव्याप्तिरत आह। साध्यासामानाधिकरणेति।

यद्यप्येवमपिस्वनित्यागंधवत्वादित्यसाधारणेसर्वमनित्यंप्रमेयत्वादित्युपसंहारिणिनिष्कलंकत्वासत्वात्तथापिउपाधेरसंकरात्
अतएवमणिकृतोपिउपाधेरसंकरएवेतिवक्ष्यति।तथाचवक्ष्यतोसाध्याभाववद्वृत्तिरेवसाधारणोपिपक्षेसाध्यसंदेहरूपपक्ष
तादृशायांएतद्द्वयमेवोद्भावयितुंशक्यतेतितयोर्भेदेवोपन्यासः।साध्येति।साध्यस्यानित्यत्वस्यव्यापकीभूतोयोभावःशब्दत्वाभा
वस्तत्प्रतियोगित्वंशब्दत्वेसद्धेतुत्वारलक्षत्वादित्यर्थः।एतत्ज्ञानेअसाधारण्यज्ञाने।साक्षाद्व्याप्त्यभावावगाहिज्ञानजननात्तत्त
त्वकथंतदाहव्यतिरेकइति।अनेनशब्दत्वेनहेतुनासाध्यानित्यत्वव्यतिरेकेसाध्येइत्यर्थः।सत्प्रतिपक्षत्वेपंचैवहेत्वाभासेतिवि
भागव्याघातइतिभावः।हेतुभेदइति।तथाचसमानबलोपस्थितप्रतिरुद्धकार्य्यलिंगत्वरूपंसत्प्रतिपक्षत्वंलिंगभेदघटितमि
त्यर्थः।अस्यशब्दत्वादेःव्यतिरेकेअनित्यत्वेसाध्येसत्प्रतिपक्षरूपत्वंनित्यत्वस्येवनित्यत्वव्यतिरेकोव्यापकव्याप्यादिमत्वं।क्वचि

सि·टी· दप्यनित्यपीतिबोध्यं।तेनोभयानुमान एवान्वयसहचाराज्ञानासंभवेन उभयानुमान एव शब्दत्वहेतोर्नान्वयित्वं।किंतु व्यतिरेकित्वमि
३८ ति।उभयानुमान एव तथा चेत्यादिना व्यतिरेकदर्शनेनानन्तानेतिमंतव्यं।नित्यत्वव्यापकेति।अनित्यत्वाभावव्यापकीभूते त्यर्थः।
साध्याभावमपि नित्यत्वाभावमपीत्यर्थः।ननु परस्परप्रतिबंधात्कथं तत्तदभावयोर्ज्ञानमत आह ज्ञानं चेति।तथा च साध्यनित्यत्वतद
भावयोरेवाज्ञानमित्यर्थः।अत्र केचित्।तत्तदभावयोर्व्याप्यवत्ताज्ञानात्।तत्तदभावयोरेव संशयाकारानुमितिर्जायते।एवं सत्यतिप
ऋस्थलेपीति।न च तदभावव्याप्यवत्ताज्ञानत्वेन तद्विशिष्टबुद्धित्वेन प्रतिबध्यप्रतिबंधकभावात्कथं संशयाकारानुमितिर्जा
यत इति वाच्यं।लौकिकप्रत्यक्षान्यत्वदोषजन्यत्वशाब्दान्यत्वादीनां प्रतिबध्यतावच्छेदकेऽवश्यं प्रवेशे विशेषणविशेष्यभावे विनिगम राम
नाविरहात्।अनेककार्यकारणभावे वरं अनुमित्यंतर्भावेन प्रतिबध्यप्रतिबंधकभावविरहात्।न च याम्स्पहत्त्रिप्रत्यक्षान्यत्वादेः प्रतिके ३८

ध्यतावच्छेदकतेत्येक एव प्रतिवध्यप्रतिवंधकभाव इति वाच्यं । व्यासज्यवृत्त्यवच्छेदकतांगीकारे गतं विशिष्टवुद्धित्वप्रतिकारणत्वात् तथा
चैककारणाविशेषापत्तेः अथैवं प्रत्यक्षान्यज्ञाननिष्ठा परोक्षत्वाख्या एका जातिरेवानुमितिशाब्दस्मृतिसाधारणी तदभावव्याप्यवत्ता
ज्ञानप्रतिवध्यतावच्छेदिका सिद्ध्यतीति चेन्नः अनुभवत्वमादाय सांकर्य्यात् । अनुभवत्वं प्रत्यक्षे तत्र न प्रतिवध्यतावच्छेदिका जातिः
प्रतिवध्यतावच्छेदका जातिसिद्धौ तत्र वनानुभवत्वमिति परस्परात्यंताभावसमानाधिकरणयोः शाब्दोपमित्यनुमित्यादौ उभयोः
समावेशात् । न चैवं प्रतिवध्यतावच्छेदिका जातिः स्मृतिव्यावृत्तेत्येवाक्ष सांकर्य्यादेवानुभवत्वं जातिर्म्मीक्ष न तु परोक्षत्वमपी
तिवाच्यं । तथाप्यनुमितित्वमपि प्रतिवध्यतावच्छेदकतया सिद्धजातिमादाय सांकर्य्यात् । अनुमितौ प्रत्यक्षे च परस्परात्यंताभाव
सामानाधिकरण्ययोरेकस्मिन्नुपमित्यादौ सांकर्य्यात् । यथा चैकप्रतिवध्यप्रतिवंधकाभावे विशिष्टानुमितित्वादिना न तदभा

सि॰टी॰ वद्याप्यवन्नाज्ञानप्रतिबध्यतेतिसिद्धैवसत्प्रतिपक्षासाधारण्यादौसंशयाकारानुमितिरितिप्राञ्चः॥ तन्नेतिकेचित्तान्तथाहिप्रत्यक्षस्थादृत्ता
३५ विशेषणानिष्ठाएका विधेयतैवप्रतिबध्यतावाच्या॥ वह्निमनुमिनोमीत्यनुभवसाक्षिकासेवचबाधसिद्ध्यादीनांप्रतिबध्यतावच्छेद
केतितांविधेयतामादायएकप्रतिबध्यप्रतिबंधकाभावेनतंसंशयाकारानुमित्येत्याहुः॥ तच्चिंत्यंपर्वतोवह्निमानितिसिद्धौविद्यमा
नायामपिवह्निमान्पर्वतोघटव्याप्यवानितिपरामर्शात्तवह्निमान्पर्वतोघटवानित्यनुमितिदर्शनात्तापर्वतोद्देश्यतावच्छेदक
कवह्निप्रकारानुमितित्वंनतादृशसिद्धिप्रतिबध्यतावच्छेदकं किंतुवह्न्यादिनिष्ठविलक्षणांविधेयतैवप्रतिबध्यतावच्छेदिकातथैव
पर्वतेवह्निमनुमिनोमिनतुवह्नित्वपर्वतत्वादिकंमनुमिनोमीतिधीःसाचविधेयतापरत्वकल्प्यापत्तेतिवक्तुमशक्यातथाहितदभा राम
वापादककल्पापत्तित्वेनप्रतिबंधकतातदभावविशिष्टबुद्धित्वेनप्रतिबध्यतेतिप्रतिबध्यप्रतिबंधकभाववसादेवपर्वतोयादृशि ३५

र्वह्निः स्यात्तत्तदा निर्धूमे स्यादित्यापत्तेरेव पर्वतो वह्न्यभाववान् संशयोच्छेददर्शनात्। निरुक्तविधेयता च तत्र तदापत्तिप्रतिबध्यमानेऽस्मादिसाधार
णएव बाध्येति प्रत्यक्षव्याप्तत्वं तस्याऽसिद्धं अन्यथा पर्वतो यदि निर्वह्निः स्यात्तत्तदा निर्धूमोऽपि स्यादित्यापत्तौ विद्यमानायामपि निर्व
ह्निः पर्वतो घटवान्नित्यादिमानसस्याप्युत्पत्त्यापत्तेः। अतः पर्वतत्वोद्देश्यतावच्छेदककविलक्षणविधेयताकवह्न्यभावज्ञानत्वं
तादृशापत्तिप्रतिबध्यतावच्छेदकं वाच्यमिति सिद्धमेव विधेयताविशेषस्य प्रत्यक्षादिसाधारणमित्यलंपल्लवेन। वस्तुतोऽआपत्तिप्र
तिबध्यतावच्छेदिका यदि प्रत्यक्षानुमित्यादिसाधारणी विलक्षणविधेयता प्रत्यक्षान्यधीनिष्ठा च सिद्धा प्रतिबध्यतावच्छेदकान्याचे
त्तर्ह्याक्रियते तदा संशयाकाशानुमितिवारणं गौरवीणापुरीरप्यशक्यमिति तत्त्वं। लाघवादाह। अन्वितिसाध्यकत्वेति। सर्वमभिधेयं प्र
मेयत्वादित्यसिद्धेतरेव वह्निमानाकाशादित्यत्र असिद्धविरुद्धान्यतरभूतमेवेति ध्येयं। केचित्तु केवलान्वयिधर्मावच्छिन्नसाध्यसंदेह

सि·टी· विषयवृत्तित्वं अनुपसंहारित्वं तथा च सर्वमभिधेयं प्रमेयत्वादित्यादिकमेव साध्यसंदेहदशायामनुपसंहारी वह्निमानाकाशात्। आकाश
४० वान् वह्नेरित्यादिकं तु यथायथमसिद्धबाधितान्तर्गतमिति भावः॥ साध्यासमानाधिकरणेति। साध्यतावच्छेदकसंबंधेन साध्याधिकर
णे हेतुतावच्छेदकसंबंधेनावृत्तित्वमित्यर्थः॥ तेन गोत्वाश्वत्वयोः कालिकेन संबंधेन सामानाधिकरण्येपि न व्याप्तिरिति ध्येयं। अत्रासा
धारणत्वमेवेत्येवकारोऽप्यर्थः साधारणत्वं चेति। चकारेण निरुक्तविरुद्धत्वपरिग्रहः॥ तथा च उपाधीति उपाधिभेदः साधारणत्वासाधारणत्ववि
रुद्धत्वादीनां भेदः। तथा च तत्तदुपाधिकृतो भेदव्यवहारस्तत्त्वेन तत्त्वेन ज्ञानदशायामनुमितिप्रतिबंधकत्वं निर्वहतीति मंतव्यः। उपरक्ते इति। अ
नुपरक्त इति संपातायातं साध्याभावप्रतिबंधकः परामर्श इत्येतावन्मात्रस्यैव सत्प्रतिपक्षत्वात्। एतावतैव च सत्प्रतिपक्षो साध्यसिद्धिविरो राम
धिपरामर्शीयस्य सत्प्रतिपक्ष इति योगार्थस्यापि निर्वाहादिति ध्येयं। उदाहरति। यथेति- असिद्धलक्षणमाहाद्यभिचाराद्युत्पत्तीति। आदि ४०

पदेन विरुद्धसंग्रहः परामर्शप्रतिबंधकत्वस्य व्याप्तिधीविघटनद्वारा तत्रापि सत्त्वादिति भावः स्वरूपासिद्ध्याद्यन्यतमत्वमेव तत्त्वमित्यपि केचि
त्तस्मात्र्यसिद्धिरित्यर्थः। स्वरूपासिद्धिलक्षणमाह। पक्षइति उदाहरति यथा घटइति आश्रयासिद्धिलक्षणमाह। पक्षइति। पक्षतावच्छेदकासिद्धि
भावइत्यर्थः। व्याप्यत्वासिद्धिलक्षणमाह तदुभयेति। आश्रयासिद्धिस्वरूपासिद्धिभिन्नोऽसिद्धो व्याप्यत्वासिद्धइत्यर्थः। अत्रासिद्धिरिति विशे
ष्यदलात् न सव्यभिचारादावतिप्रसंगः एवं च हेतुविशेषणवैयर्थ्यसाध्यविशेषणवैयर्थ्यादिना विधेयप्रयोज्यत्वं व्याप्यत्वासिद्धत्वं बोध्यं धू
लीपटलइति इदमुपलक्षणं हेतुविशेषणवैयर्थ्यात् नीलधूमादिरपि व्याप्यत्वासिद्धइति मंतव्यं। लाघवादाह। साध्येति। तथा च साध्य
तावच्छेदकावच्छिन्नाप्रसिद्धिः हेतुतावच्छेदकावच्छिन्नाहेत्वप्रसिद्धिर्वेति लक्षणद्वयार्थः। तथा च हेत्वप्रसिद्धावपि तद्धेतोर्नाव्याप्तिः सा
ध्याप्रसिद्धावपि तत्साध्यनिरूपितव्याप्तिर्नेति तत्र व्याप्यत्वासिद्धत्वं। बाधलक्षणमाह पक्षइति साध्यशून्यत्वं साध्यसामान्याभा

सि॰टी॰ वत्त्वमित्यर्थः। तेन विशेषाभावमादाय न सद्धेतौ दोषः। न वा त्रेति। अत्र जलादिपक्षकवह्न्यनुमाने कर्तव्यर्थे। न ह्येवं बाधस्यानित्यदोषतास्या
४१ त्परामर्षभ्रमकाल एव दोषत्वं। न तु परामर्षसत्वकालित्वसिद्ध्यादेरेव दोषत्वादित आह। आद्यकालावच्छिन्न इति। अत्र यद्यपि पक्षता
वच्छेदककामानाधिकरण्येनानुमितौ सामानाधिकरण्येन वा बाधो न दोषस्तथापि पक्षतावच्छेदकावच्छेदेनानुमितौ पक्षतावच्छे
देनेह बाधो दोष इति मंतव्यं। पक्षांशेन्निर्वृति। तथा च न वा व्याप्यत्वासिद्धिर्न वा स्वरूपासिद्धिस्तत्र दोषः अपि तु बाध एवेति तत्त्वं। दिग्।
अज्ञानरूपसिद्ध्यादीनां न हेत्वाभासत्वं। हेत्वाभाससामान्यलक्षणस्याभावात्। ज्ञायमानदोष एव हि तस्य संभवात्। न चाज्ञाना
सिद्ध्यादितथेत्यादि मंतव्यं। अत एवेति। पंचैवेत्यर्थः। तदन्यतर इति। सव्यभिचाराद्यन्यतरांतर्गत इत्यर्थः। अनेवंभूतत्वात्। अहेत्वा राम
भाषत्वात्। वक्ततो व्यभिचारानुमानद्वारा उपाधेरनुमानप्रतिबंधकत्वेन परस्तु विनिरीक्ष्यकतया न दोषत्वं। अनुमितितत्का ४१

रणस्य साध्यवान्नसाध्यव्याप्यवानित्याकारकसमूहालंबनात्तु मितेर्वा साक्षात्प्रतिबंधकत्वस्यैव हेत्वाभासत्वात्तात्तद्वसाक्षात्तत्वाश्र।
तिबंधकस्य परस्तु खनिरीक्षकस्य नोपाधेः संभवतीति तत्त्वं। अत्रैव एव परस्तु ख निरीक्षकत्वादेव सिद्धसाधनेति। तथा च पक्षता वि
घटनद्वाराहितदनुमितिप्रतिबंधकं न तु साक्षादिति न हेत्वाभासत्वमिति भावः। प्रसंगादुपाधिं निरूपयितुमाह। नन्विति। आ।
चार्य्याः हत्यर्थे आचार्य्य इत्यर्थः। अन्यथा यौगिके साध्यसमव्याप्तत्वस्येवोपाधित्वस्य तैः स्वीकारादिति ध्येयं। लाघवादभावा
गर्भितं व्यापकत्वमाह। तत्समानाधिकरणेति। यत्समानाधिकरणाव्यापकत्वेनाभिमतसमानाधिकरणादित्यर्थः। लक्ष्येलापयति
प्ययेति। धूमसमानाधिकरणा इति। यतः इत्यादि। तदसत्वात्तात्तथा च तत्तन्निष्ठात्यंताभावप्रतियोगित्वमेव तदव्यापकत्वमिति मा
वः। मेवं नोपाधिरित्यर्थः। इदं उक्तोपाधिलक्षणं श्यामत्वव्यापकं शुद्धश्यामत्वव्यापकमित्यर्थः। किं लिति। साधनीभूतमित्रातनय

त्वावच्छिन्नश्यामत्वव्यापकमित्यर्थः॥ अथेति॥ तथा च मित्रातनयत्वसाधनावच्छिन्नव्यापकं शाकपाकजत्वं मित्रातनयत्वसाधनाव्या
पकत्वं च भवत्येवोपाधिरिति भावः॥ अव्याप्तिं लापयति॥ न हीति॥ एतत् उद्भूतरूपवत्त्वं वहिर्द्रव्यत्वेति॥ पक्षधर्मीभूतवहिर्द्रव्यत्वे
त्यर्थः॥ कथं व्यापकत्वेत्यत आह॥ यावतीति॥ तद्वृत्तिवहिर्द्रव्यत्वावच्छिन्नप्रत्यक्षत्ववतीत्यर्थः॥ नन्वस्मिन्ननुमाने उद्भूतरूपवत्त्व
संग्रहाय पक्षधर्मावच्छिन्नसाध्यव्यापकतागर्भितमेवोपाधित्वं वाच्यमित्याह॥ अथेति॥ यथोक्तेति॥ स श्यामो मित्रातनयत्वा
दित्यादौ॥ तथाविधेति॥ पक्षधर्मीभूतद्रव्यत्वाद्यवच्छिन्नेत्यर्थः॥ पक्षैकादौ॥ असत्त्वा उपाधेः शाकपाकजत्वस्यासत्त्वात्॥ ननु किंचिदवच्छि
न्नसाध्यव्यापकत्वे सतीत्येव लक्षणे निवेशनीयं न तु साधनपक्षधर्मीदीनां विशिष्टांतर्भाव इत्याशंकते॥ यत्किंचिद्धर्मावच्छिन्नेति॥ म
हानसत्त्वाभावेऽतिव्याप्तिं लापयति॥ भवती हीति॥ तादृशेति॥ महानसान्यत्वावच्छिन्नवह्निमतीत्यर्थः॥ असत्त्वात् महानसत्त्वाभावस्येत्या

दिखानधिकरणेति। स्वं उपाधित्वेनाभिमतं शाकपाकजत्वादि तदनधिकरणीभूतं साधनाधिकरणं गौरमित्रातनयत्वादिमद्वृ
त्तिधर्म्मो मित्रातनयत्वं भवति च तदवच्छिन्नश्यामत्वव्यापकं शाकपाकजत्वं। तथा च काकेतादृशश्यामत्वशून्ये शाकपाकजत्व
विरहेपि क्षतिविरहात्। एवं स्वं उद्भूतरूपं तदनधिकरणं गगनादि तद्वृत्तिधर्मो बहिर्द्रव्यत्वं भवति च तदवच्छिन्नप्रत्यक्षत्वव्यापकं
उद्भूतरूपवत्वं। तथा चात्मनि तादृशप्रत्यक्षत्वशून्ये उद्भूतरूपविरहेपि क्षत्यभावात्। एवं धूमवान्वह्नेरित्यादौ उक्तसाध्यव्याप
के स्वार्द्रेन्धने स्वानधिकरणसाधनाधिकरणायोगोलकवृत्तिपर्वतत्वायोगोलकान्यतरत्वावच्छिन्नसाध्यव्यापकतासत्वात्। सद्धे
तौ महानसत्वाभावे तु नैवं व्याप्तिं करिष्यति सर्व्वमप्यदूतिध्येयं। न चैवं नानाव्यक्तिकोपाधौ लक्षणानभिगमो दोषः स्वत्वगर्भित
त्वात्। किं च तत्तदार्द्रेन्धनानधिकरणवृत्तिधर्म्मावच्छिन्नसाध्यं पर्वतचत्वरादिषु तावतां च साध्यानामव्यापकं तत्तदार्द्रेन्धनं

सि·टी· अपि च संयोगी सत्वादित्यत्र गुणकर्म्मान्यत्वविशिष्टसत्तायाः सत्तारूपत्वेन स्वाधिकरणसाधनाधिकरणसाधनाधिकरणाप्रसिद्धेर
४३ तआह। वह्वेति स्वावच्छिन्नेति। स्वं उपाधितावच्छेदकं। तद्वता दृशसाध्यव्यापकत्वं च व्यापकत्वं लापयति भवति हीति। अतत्तदा
ईंधनमिति। उपाधिः इत्यत्वादि किंचिद्धर्म्मावच्छिन्नसाध्यव्यापकतावच्छेदकावच्छिन्नरूपवत्वमुपाधिः शाकपाकजत्वमुपा
धिरित्याद्यपि व्याख्येयं सद्धेतौ प्रसिद्धानुमाने महानसत्वाभावेऽतिव्याप्तिं वारयति। नन्वेवमिति। अत एव अव्यापकत्वादेवत्र
व्यापकत्वमेवाह। पक्षमात्रेत्यादीति। तथा च स्वानधिकरणीभूतसाधनाधिकरणवृत्तिधर्म्मावच्छिन्नं साध्यं पक्षेऽपि तन्मात्रवृत्तिधर्म्मस्या
पि यावत्वं तत्प्राप्ति तथा तत्सामानाधिकरण्यस्य पक्षेतरत्वेऽभावात् पक्षेतरत्वस्य व्यापकत्वमिति भावः। संक्षेप इति। बाधोन्नीत पक्षेत राम
रत्वं उपाधिरेवेत्यवधेयं। यथा वह्निरनुष्णकृतकत्वादित्यादौ वह्नीतरत्वं इत्याद्यूह्यं सद्धेतौ पर्थानुमाने प्रतिज्ञादौ पंचावयवप्रयोग ४३

घटितन्यायापेक्षणात्तेषां प्रतिज्ञादीनां स्वरूपमाह। तत्रैवेति। सद्धेतावित्यर्थः। उदासीनन्यायाघटकोन्मत्ताद्युक्तपर्वतो वह्निमानिति
वाक्यातिव्याप्तिवारणायाह न्यायेति। तथा च तादृशतादृशमुन्मत्ताद्युक्तं वाक्यं न न्यायघटकमिति तद्व्युदास इत्यर्थः। न्यायश्च उचि
तानुपूर्वीकप्रतिज्ञादिपंचकसमुदायः। क्वचित्तु न्यायश्चकामिकेत्यादिनायं ग्रन्थस्तैव चेदिति ध्येयं। पर्वतो वह्निमानिति शाब्देति। तथा
च शाब्दानां तेषां भिन्नत्वात्प्रतिज्ञात्वादिकं भिन्नमेवेति भावः। अवयवविभाजक इति। अवयवविभाजकप्रतिज्ञायत्वादिकमेवेति
भावः। अत एव उद्देश्यानुमित्यन्यूनानतिरिक्तविषयकशाब्दज्ञानजनकं वाक्यं प्रतिज्ञेति सामान्यतः प्रतिज्ञालक्षणमिति मणिकृतः
तदुक्तोपदेशसाध्यनिर्देशः प्रतिज्ञेति सूत्रे चोपपद्यते। एतद्धूमादितीति। अत्रापि सर्वत्र न्यायांतत्वे विशेषणं बोध्यं। तादृशेति। अवय
वविभाजकेत्यर्थः। तच्च हेतुत्वादीति मंतव्यं। एतत्त्रयो यो धूमवानिति तत्रापि न्यायान्तर्गतत्वे सतीति प्रत्येकं बोध्यं। एवमुपनयनिगम

नयोयथायथंव्याख्येयं।प्रतिज्ञादिलक्षणाविनष्टावयवत्वंनिर्व्यक्तिअवयवत्वमितिस्वोक्तेशाचांसम्मतिमाह।उक्तंचेति।अवसर
संगत्योपमानंनिरूपयितुमाह।अथेति।अथउपमाननिरूपणप्रतिबंधकानुमाननिरूपणप्रतिबंधकानुमानजिज्ञासानिवृ
त्तिलक्षणमित्यर्थः।शिष्यावधानायप्रतिजानीतेनिरूप्यतइतिलक्षणस्वरूपप्रमाणादिभिर्निरूप्यतइत्यर्थः।उपमिनोमीत्यनु
भवेति।तत्राचप्रत्यक्षवलादुपमितित्वंजातिरित्यर्थः।उपमिनोमीत्यनुव्यवसायापलापेलाहशब्दविषयत्वेतिमनुमित्यादीत्या
दिपदात्तशब्दादिपतिरिग्रहः।उपमितिलक्षणेऽसंभवमाशंकते।नन्नूपमितौतीति।काओषधीज्वरंहंतीतिप्रश्नेदशमूलसदृशञ्च
रंहेतीत्युहृरितितत्रोपमित्याज्वरणाकार्य्यकारणभावग्रहस्तत्रोपमितेःशक्तिपदादिविषयकत्वव्यभिचारादितिभावः।नचपदमि राम
तिउपमितेःशक्तिविषयतानियमेनकाओषधीरित्यादावपिपदविषयताचावश्यकीकार्य्यकारणभावग्रहस्तत्रानुमित्यानत् ४४

पमित्येतिभावः।उपमितिकरणंनिरूपयितुंपृच्छति।कुतइतिशादृश्यादीति।तथाचतादृश्यानुभवकरणंतत्स्मृतिर्व्यापारः।उपमितिफल
मितिभावः।इदमेवविशदयति।तथाहीति।नचैवमुपमितिःक्व नचाक्षुषादिप्रमित्यंतर्गतैवास्त्वात्क्वतेतदर्थमधिमानेत्साशंकांपरिह
रतिनहीतदिति।ततोविलक्षणत्वेनमानमविलक्षणत्वेनेत्यर्थः।उपमितेराकारमाहउपमिज्ञाविति।अन्यथासादृश्यस्यावच्छेदक
त्वेनप्रतीतिमूलेतिव्यवहारः।शब्दप्रयोगमशक्तिज्ञानमूलकःस्यादित्यर्थः।गोरवेण।शक्यतानवच्छेदकत्वात्सादृश्यस्येतिभावः।अ
तइतिअनुमित्यादिविरुद्धधर्मत्वात्।इयमुपमितिः।करणस्यसव्यापारत्वादाहतत्स्मृतीति।सादृश्यज्ञानंसादृश्यनिश्चयःतत्सह
कारीवाक्यार्थानुभवोपमानसहकारीत्यर्थः।तद्वेति।ततसादृश्यज्ञानजन्यइत्यर्थः।वैधर्म्यज्ञानजन्योपमितिश्चाहयथेति।तदात
तशद्वेतिजलादिविधर्मापृथिवीतिगुरूक्तवाक्यार्थस्मरणादित्यर्थः।एवंएवंक्रमेणेत्यर्थः।इत्युत्तरेगुरूक्तरेत्यर्थः।इदानींसाधर्म्य

सि॰टी॰ ज्ञानयोरेकेनरूपेणोपमितिं प्रतिकारणतेत्याह तस्मादिति। यत्किंचिदिति। सादृश्यवैधर्म्याद्यवच्छेदेनेत्यर्थः॥ विशेषेति। विशेषा
४५ कारेण किंचिद्धर्मावच्छेदेनागृहीतशक्तिकपदवाच्यत्वरूपेत्यर्थः। अत एव कीदृग्गवयइतिप्रश्नवाक्ये किंधर्मावच्छिन्नो गवयपद
वाच्य इत्यस्य विषयत्वं उपपद्यते। उपपद्यते च किंचिद्धर्मावच्छेदेन शक्तेरनिर्णयात् प्रश्न इति ध्येयं। यद्यप्यनिर्णीतशक्तिकपदजन्य
वाक्यार्थानुभवोपि न संभवति। वाक्यार्थानुभवे शक्तिनिश्चयस्यापि हेतुत्वात्। तथापि यत्किंचिद्धर्मावच्छेदेनानिर्णीतशक्तिकप
दजन्याजन्यानुभवस्य शक्यतावच्छेदकांशे संदेहेपि गवयादिपदं ज्ञातशक्तिमिति निश्चयस्य संभवात् तत्रिन एव तथाहीत्यादिना सा
मान्यतो गवयपदवाच्यो। किंचिदस्तीति ज्ञानतः इति ग्रंथकृतोक्तमिति चेदितव्यं। तथा च सर्वत्र सादृश्यज्ञानजन्य वैधर्म्यज्ञानजन्योप राम
मितौ अनिर्णीतशक्यतावच्छेदकपदवाच्यतागोचरवाक्यार्थानुभवत्वेन करणतेति भावः॥ किंचिद्धर्मविशिष्टेति तद्वत्ताधीः करणीभू ४५

तवाक्यार्थानुभवोद्देश्यतावच्छेदकसादृश्यवैधर्म्यान्यतरवत्त्वाधीरित्यर्थः ॥ ननु धर्मेगवयत्वादिज्ञानौ गुरुधर्मविशिष्टसादृश्यादिविशिष्ट
त्यर्थः ॥ सादृश्यादीत्यादिपदात् । क्वचिद्वाक्यार्थानुभवोद्देश्यतावच्छेदकीभूतवैधर्म्यज्ञानसहकारीभूतसादृश्यादिज्ञानविशेष्यतावच्छे
दकत्वे नज्ञानस्वरूपसहकारिपरिग्रहः ॥ तदवच्छेदेनैव सादृश्यादिगुरुधर्म्मावच्छेदेनैवेत्यर्थः ॥ वाच्यतेति । उपमित्यात्मकोग्रह इत्यर्थः ॥ वाधा
तगुरुधर्म्मावच्छेदेशक्तेर्वोधेन तद्धर्म्मावच्छेदेन शक्यत्वगाहना तत्र मत्वमिति भावः ॥ संक्षेपइति अत्र केचित् उपमितिप्रत्यक्षप्रमि
तिनिविष्टेति नोपमानंप्रमाणान्तरमिति तथाहि । सादृश्यज्ञानप्रतिवध्यतावच्छेदकं पदवाच्यत्वस्य उपमितिभिन्नमानसत्वं मानस
त्वविशिष्टोपमितिभेदोवा सादृश्यज्ञानप्रतिवध्यतावच्छेदक इत्यत्र विनिगमकाभावेन नानाप्रतिवध्यप्रतिवंधकभावकल्पना
मपेक्ष्य लाघवान्मानसत्वमेव प्रतिवध्यतावच्छेदकमस्त्विति वाच्यं एकत्रयद्धमितिन्यायेन उपमितिभेदस्य मानसत्वस्य च प्रति

सि॰दी॰ वध्यतावच्छेदकत्वात्। व्याप्त्युपहितिनी चावच्छेदकतेति मंतव्यं। नचैवमेकविशेषणाविशिष्टेऽपरवैशिष्ट्यमिति न्यायेनावच्छेदकतायां वि
४६ निगमनावकाश इति वाच्यं। तस्य विशेष्यतावच्छेदकप्रकारकनिश्चयव्यंग्यत्वेन विलंबोपस्थितिकत्वात्। अस्तुरपि विशेषोऽध्यवसा
य इति न्यायात्। एकत्र द्वयमिति न्यायेनैव उपमितिभेदमानसत्वयोः प्रतिबध्यतावच्छेदकत्वं। अत एव गुणदीधितिकृतापि एकत्वत्वा
पेक्षया एकपृथक्त्वस्यावधिज्ञानव्यंग्यत्वेन गुरुत्वमुक्तं। अथैवमुपमितेर्मानसत्वे गवयपदवाच्यत्वमुपमिनोमि न साक्षात्क
रोमीति न स्यात्। त्वन्मते उपमितेर्मानसज्ञानत्वेन तत्रापि साक्षात्कारत्वसत्वादिति चेन्मैवं। न साक्षात्करोमीति प्रतीत्या तत्र साक्षा
त्कारत्वाभावो न विषयीक्रियते। किंतु लौकिकविषयत्वाभाव एव विषयीक्रियते अत एव सुरभिचंदनमिति चाक्षुषानंतरं चंदनं राम
साक्षात्करोमि न सौरभमिति प्रत्ययोप्युपपद्यते। तत्रापि सौरभे लौकिकविषयत्वाभावस्यैवावगाहनात्। तस्मादुपमितिर्मानसज्ञान ४६

रूपेति न तत्करणं प्रमाणांतरमिति व्याहृतं चत्वार्येव प्रमाणानीति शूत्रकृदुक्तमित्याहुः। तत्तु चेल्लाघवात्मानसत्वजातेरेव सादृश्य
ज्ञानप्रतिबध्यतावच्छेदकत्वात् न तदुपमितिः। भित्रमानसेतलाघुपाधे र्गुरुधर्मस्य एवंच मानसत्वस्य प्रतिबध्यतावच्छेदकत्वे लाघवात्तमिद्धे
उत्तरं उपमितित्वं तत्करणकार्यकारणभावादिकल्पनं फलमुखगौरवं तथा च न दोषमावहतीति। न च तथापि यत्रेच्छा घटादिविषयिण्या
तदा गोसादृश्यप्रज्ञाने विद्यमानेपि घटादिमानसदर्शनात् तत्तन्मानसेच्छाभाववविशिष्टगोसादृश्यादिज्ञानत्वेन तत्तन्मानसत्वेनेति
। विशिष्येवा प्रतिबध्यप्रतिबंधकभावावश्यकत्वे च्छालाघवमिति वाच्यं तथापि मानसत्वादिरुद्धोपमितित्ववादिनानुपमित्यन्यमा
नसं जायतामितीच्छायामपि सादृश्यप्रज्ञानोत्तेजकत्वं वाच्यं तदेव न वाच्यमिति लाघवस्यैव जागरूकत्वात्। गवयपदवाच्यत्वोपमि
तेरेवेति तादृशेच्छायाश्च उत्तेजकत्वात्तावदुक्तो उपमितित्वस्य मानसत्वव्याप्यत्वे यत्र गवयपदवाच्यत्वस्य उपमितिर्जायतामिति

॥सि.दी.॥ ष्ठापस्त्वाच्यत्वस्मानसंजायतामित्यपीष्ठा।।एवमुपमितिर्जायतामुपमिमिमित्यनुमानसंचजायतामितिवाइष्ठातत्रोभयत्रैवउपमितोरे
॥ ४७ ॥ वजायतेनतुमानसमितिसर्वसिद्धं।अन्यथाउपमितिसामग्रीनसत्वेउक्तेच्छावशातउपमितिवत्तत्रानुमानस्याप्याप्तेः।नतुव्याप्यध
र्मावच्छिन्नेजायमानेव्यापकधर्मावच्छिन्नेनजायतइत्युपमितितदनुमानसंसृष्टालंबनमेवस्यात्।अतोसादृश्यज्ञानादेःप्रतिवद्धंमा
नसत्वमेवनतमित्यन्यस्यापिपूर्वेशइतितत्वोउपमानशब्दनिरूपणयोःएकप्रयोजनकत्वव्याप्त्यासंगतिंप्रदर्शयन्नुद्देशिष्यावधानाय
चप्रतिजानीतेअथेत्यादिनाइहाथपदेनउपमाननिरूपणानंतरत्वरूपदृत्तिलाक्षणिकेनआनंतर्यावच्छिन्नस्थितेउपमाननिरू
पणोशब्दोनिरूप्यतइत्यनेनवर्तमानताकलटप्रत्ययांतत्वेनसाध्यतायाउपस्थितस्यचशब्दनिरूपणोभयोरेवसिद्धसाध्यसममित्या रामः
हारहेतुकानुमानलभ्यस्यहेतुहेतुमद्भावस्यसंगतित्वंसूच्यते।अत्रानुमानेव्याप्तिश्चसाध्यत्वरूपेणायत्निष्ठत्वाधिकरणारूणादृत्तित्वं ४७

च्यापतेः